श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

## श्रीमदाशुकविसार्वभौम श्रीनिधेः कृतिषु

# ॥ श्रीमन्दस्मितरामायणम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

# विषयसूची


1 बालस्पन्दः .............................. . . . . . . . . . . . . . . . . . . 2

2 अयोध्यास्पन्दः .............................. . . . . . . . . . . . . . . . . . 12

3 अरण्यस्पन्दः .............................. . . . . . . . . . . . . . . . . . 16

4 किष्किन्धास्पन्दः .............................. . . . . . . . . . . . . . . . 21

5 सुन्दरस्पन्दः .............................. . . . . . . . . . . . . . . . . . 25

6 युद्धस्पन्दः .............................. . . . . . . . . . . . . . . . . . . 36

7 प्रकीर्णस्पन्दः .............................. . . . . . . . . . . . . . . . . . 43

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ बालस्पन्दः ॥

कविताजितकल्लोलिकन्यकाकान्तवक्षसे।
करुणादिगुणाढ्याय कमलानिधये नमः॥

श्रीमद्वेङ्कटशेषदेशिकमणेरस्मद्गुरोर्भारतीम्
अन्यादृक्षमदीयदिव्यसुषमासेवेति पद्याकृतिम्।
अन्तर्भावयतो बहिर्यदभवन्मन्दस्मितं तत् प्रभो !
मह्यं सम्पदमातनोतु सततं मह्याः सुतायाः पते ! ॥ **1.1** ॥ 1

सीतालक्ष्मणमध्यमण्डनमणेः रामस्य रस्यात्मनः
पीताङ्गस्य हनूमतश्शुभदृशा बद्धाञ्जलेस्सादरम्।
भीतोपेतविभीषणाय दयया दातुस्समस्तश्रियां
शीतांशुप्रतिमाननस्य मधुरं मन्दस्मितं पातु नः॥ **1.2** ॥ 2

“महापापौघानामहमनुपमानां रचयिता
दशास्यानां जेता मम रघुपते ! देहि चरणौ”।
इति श्रीमद्वाचाऽवनिदुहितृसौमित्रिहनुमत् -
समक्षं यन्मन्दस्मितमिदमिमं पातु तव माम्॥ **1.3** ॥ 3

“विष्णो ! पङ्क्तिरथस्य पार्थिवमणेः पुत्रत्वमेत्यावनौ
कुर्याः पङ्क्तिमुखस्य राक्षसपतेः दुष्टात्मनस्संहृतिम्”।
दान्तिं पङ्क्तिमहो प्रदर्श्य विबुधैरित्यर्थितः सादरं
त्वं तां पङ्क्तिमदर्शयन् यदकरोः मन्दस्मितं पातु तत्॥ **1.4** ॥ 4

“मा मा भीतिर्भवतु भवतां भद्र”मित्युक्तिरम्यं
मायापेतं सदसि मरुतां यत् स्मितं मन्दमासीत्।

मुग्धं तत्किं वसति च मुखावासने स्वानने ते
स्निग्धं मह्यं दिशतु तदिदं भद्रपूर्णामभीतिम् ॥ **1.5** ॥ 5

“साहाय्यं तव संविधातुमवनौ सृष्टो मया जाम्बवान्”
“स्नेहस्ते परमः पितामह ! मयि” “त्वं मत्पिता किंन्विदम् ?”।
“किन्नाजो मम हे ! पितामह इह श्रीम”न्निति व्याहृतौ
धातुस्ते च यदास मन्दहसितं तत्तेऽद्य विद्योतते ॥ **1.6** ॥ 6

“दत्तः किं मम रङ्गिणा करुणया सत्यं सुतस्तत्समः
किं वाऽथ स्वयमेव येन सुषमा काचिन्मुखे तावके।
नेत्रं कोमलपद्मपत्रविपुलं वत्से”ति मातुर्गिरा
यन्मन्दस्मितमास्यभूषणमभूत् तत्तेऽद्य विद्योतते ॥ **1.7** ॥ 7

“निद्रामेति न लालितोऽपि मधुरैः गीतैस्सुमित्रे ! शिशुः
वालेऽस्मिन् तव लक्ष्मणे तु निहिते द्रागेति निद्रा”मिति।
मातुस्ते गदितं निशम्य रचितं मन्दस्मितं यत्त्वया
तत् किं दर्शयसि स्वयं मम पुरः श्रीमातृवंश्यस्य भोः ॥ **1.8** ॥ 8

डोलायां जननी न सुप्त इति सा त्वां वीक्ष्य तूर्णं ततः
सौमित्रिं सविधे विधाय मधुरं गातुं प्रवृत्ता तदा।
साकूतं तव नाम यच्च वदने मन्दस्मितं मञ्जुलं
तद्वेदं वडुवूर्निवास ! भगवन् ! हे ! रामभद्र ! प्रभो ! ॥ **1.9** ॥ 9

“त्राता तस्य गजस्य किं नु तनयो जातो ममाऽयं पुमान्
आदावेव गजाधिरोहणविधौ आनम्य पृष्ठे धृतः।
सानन्देन गजेन सद्मनयनं तेने”ति वाचा पितुः
यन्मन्दस्मितमानने तव बभौ तत् किंन्विदं राजते ? ॥ **1.10** ॥ 10

“अहं वेद्मीत्”येवं वदति कुशिकश्रीतनुभवे
वसिष्ठस्यादेशाद् अपि दशरथे स्वस्थमनसि।
धनुर्हस्तस्यासीद् वदनकमले मन्दहसितं
यदेतत् तत् स्वामिन्! जयति वडुवूर्वास! भवतः॥ **1.11**॥ 11

भूयश्चित्राः सुरम्याः पथि कुशिकभुवः
शृण्वतस्ते कथास्ताः
दृष्ट्वा सौमित्रिवक्त्रं रसमनुभवतः
प्रीतिमन्मानसस्य।
आसीन्मन्दस्मितं यद् वदनकमलजं
हन्त! साकूतमेतत्
सत्यं सम्पन्मयं सत् स्फुरति रघुपते!
पश्यतश्चित्तहारि॥ **1.12**॥ 12

“सुन्दस्त्री न तु सुन्दरी बलवती नैषाऽबला राक्षसी
यक्षी नो बत! ताटका नरसिराहारा नराहारिणी”।
इत्येवं कुशिकात्मजस्य वचसा मन्दस्मितं यन्मुखे
जातं तेन सहासि किं नु वडुवूर्देशं समभ्यागतः?॥ **1.13**॥ 13

“एतां नाशय ताटकां न हि घृणा नारीति कार्या त्वया
नारीयं खलु रूपतो रघुमणे! दुष्टो महान् कर्मतः”।
इत्याकर्ण्य मुनेर्वचस्तव मुखे मन्दस्मितं यद् बभौ
तद्वेदं वडुवूर्निवास! भगवन्! हे! रामभद्र! प्रभो!॥ **1.14**॥ 14

“वध्येयं वनितेति मा वह दयां काव्यस्य माताऽपि सा
वाञ्छन्ती विबुधाधिनाथरहितं लोकं हता विष्णुना”।
इत्थं गाधिसुतोदितां श्रुतवतो वाचं रघूत्तंस! ते
यन्मन्दस्मितमानने समभवत् सत्यं तदेतत् प्रभो!॥ **1.15**॥ 15

हत्वा तां मुदितेन तेन मुनिना दत्तानि मूर्तान्यहो !
सर्वास्त्राणि विधेयतामुपगतान्यग्रे विलोक्य प्रभो !।
यन्मन्दस्मितमास वक्त्रकमले तत्ते जगन्मङ्गलं
श्रीमन् ! श्रीवडुवूर्विहार ! भगवन् ! अद्यात्र विद्योतते ॥ 1.16 ॥ 16

“उच्चैर्वृक्षगणैर्धरातलभवैः पीताम्बरैश्शोभनैः
मेघश्यामलकोमलैः परिवृतः सिद्धाश्रमश्शोभते।
अस्मिन् वामनसिद्धिदे मम मखो वत्से”ति वाचा मुनेः
यन्मन्दस्मितमास तेऽत्र वडुवूर्देशे तदेवेक्ष्यते ॥ 1.17 ॥ 17

आकाशे रजनीचरैः परिवृते रक्तेन वेदिस्थले
हाहेति ध्वनिना मुखे च मुखरे तेषां मुनीनामपि।
आसीत्ते वदने स्मितं मितमिदं हस्ते शरा आशराः
ध्वस्तास्तैर्हि समुद्रमध्यपतितो मारीचनीचोऽपि सः ॥ 1.18 ॥ 18

“आकाशे रजनीचराः अहह ! ते वर्षन्ति रक्तान्यमी
यातास्ते क्व नु रामभद्रधनुषा मुक्तैः शरैस्ताडिताः ?”।
इत्येवं कुशिकात्मजस्य सवने जाता मुनीनां गिरः
श्रुत्वा ता वदने तवातिमधुरं मन्दस्मितं तत् किमु ? ॥ 1.19 ॥ 19

“याम श्रीमिथिलां धनुर्विजयते यत्राद्भुतं शाम्भवं
कन्यारत्नमपि प्रकामसुभगं यत्रास्ति वासुन्धरम्”।
इत्येवं वचसा मुनेस्तव मुखे मन्दाक्षवीर्यान्वितं
यन्मन्दस्मितमाबभौ रघुमणे ! तत्सत्यमेतत् प्रभो ! ॥ 1.20 ॥ 20

यात्रा रथैर्गजतुरङ्गपदातिभिः किं
हृद्या तवाथ शकटीभिरियं मुनीनाम्।
इत्थं मुनौ वदति राम ! तवानने यद्
मन्दस्मितं तदिदमित्यवधारयामि ॥ 1.21 ॥ 21

शतशकटसमुत्थैराकुलैश्शब्दजालैः
शतपथमुखजाभिस्सत्कथाभिर्मुनीनाम्।
शतदलमुख ! यत्ते मन्दमासीत् स्मितं तत्
शतमुखमिह मोदं पश्यतां संविधत्ते॥ **1.22**॥ 22

“शिला बाला काचित् बलमथनलीलाविलुलिता
वसत्यस्मिन् देशे तव पदरजो वाञ्छतितराम्”।
इति श्रुत्वा वाचं कुशिकसुतवक्त्राद्विगलितां
स्मितं मन्दं यत्ते जयति तदिदं श्रीरघुपते !॥ **1.23**॥ 23

शिला सा संस्पृष्टा चरणरजसा ते रघुपते !
पुरोदेशे जाता परमरमणीयाऽथ रमणी।
मुनेः प्रान्ते चाभून्मुनिरथ परः कोऽपि मुदितः
मुखे मुग्धे मन्दस्मितमपि मनोज्ञं तव तदा॥ **1.24**॥ 24

विश्वामित्रमुनीश्वरेण कथिताहल्याकथां शृण्वतः
पादस्पृष्टशिलातलात् समुदितां श्यामां पुरः पश्यतः।
वेगादागतगौतमामलमुखात् जाताशिषो भेजुषः
यन्मन्दस्मितमास राम ! तदिदं किन्त्वत्र विद्योतते॥ **1.25**॥ 25

“भङ्क्त्वा राम ! शिलामदा मम मुदा पूर्णामिमां भामिनीं
भङ्क्त्वा नाम धनुर्भजावनिभवां श्रीजानकीं भामिनीम्”।
एवंवादिनि गौतमे कुशिकभूसन्तोषसंवर्धके
यन्मन्दस्मितमानने तव बभौ तत् साम्प्रतं भासते॥ **1.26**॥ 26

“दारान् मह्यमदा मुदा परिगतानानन्दपूर्णोऽस्म्यहम्
आनन्दस्तनुजश्शतानन इतस्तुभ्यं स तान् दास्यति”।
एवंवादिनि गौतमे कुतुकिना श्रीकौशिकेनेक्षितं
यन्मन्दस्मितमानने तव बभौ तद् द्योततेऽद्य प्रभो॥ **1.27**॥ 27

“सौन्दर्यस्य विभूषणं विजयते सोऽयं कुमारो नवः
सीता चेयममुष्य भूषणतया स्थातुन्तरामर्हति।
मध्ये कामठपृष्ठतोऽपि कठिनं शैवं धनुर्वर्तते
भाग्याढ्या मिथिला नु ने”ति जनतालापान्नु मन्दस्मितम्॥ **1.28**॥ 28

“मन्माता किमदर्शि दाशरथये”? “सन्दर्शिता सङ्गता
पित्रा ते जमदग्निनेव मुनिना श्रीरेणुका सा पुरा”।
इत्थं गौतमसूनुना सह मुनौ सम्भाषमाणे तदा
यद्राम! स्मितमानने तव बभौ तत्सत्यमेतत् प्रभो!॥ **1.29**॥ 29

“सोऽयं गाधिसुतो महान् शृणु कथां तप्तं तपस्तादृशं
यस्यापत्यमुदाहरन्ति भरतश्रीमातरं तादृशीम्”।
एवंवादिनि गौतमस्य तनये मन्दस्मितं यन्मुखे
रामाभूत्तव तत्किलात्र मधुरं विद्योततेऽत्रोत्तमम्॥ **1.30**॥ 30

“चक्रे काञ्चन देवलोकवनितां सद्यश्शिलामागताम्
एतत्तिष्ठतु देवलोकमपरं सोऽयं मुनिर्निर्ममे”।
एवं नाम निशम्य तत्र च शतानन्दस्य वाचं मुनेः
यन्मन्दस्मितमानने तव बभौ तत् साम्प्रतं दृश्यते॥ **1.31**॥ 31

“शुनश्शेपं पित्रा धननिहितदृष्ट्या नृपतये
परित्यक्तं मात्रा शरणमिति पादान्तपतितम्।
अरक्षद्यः पुत्रानपि शतमहो! शापविषयान्
विधाये”ति श्रुत्वाऽभवदवतु मन्दस्मितमिदम्॥ **1.32**॥ 32

“अतिक्षुद्युक्तस्सन् स्वकरकलितस्वन्नमपि यः
परस्मै दत्वा तत् परिहृतमनोजातविकृतिः।
तपश्चक्रे भूयो मुनि”रिति शतानन्दवचसा
स्मितं मन्दं यत्ते तदिदमवतान्मां रघुपते!॥ **1.33**॥ 33

“आनीतं शकटे मनुष्यनिवहैः सङ्ख्यातिगैस्तद्धनुः
शैवं शैलसमानसारमभवद् विष्णुश्शरो यत्र सः”।
इत्थंवादिनि गाधिनन्दनमुनौ मन्दस्मितं राम ! ते
यत्तत् साम्प्रतमानने विजयते कल्याणदं पश्यताम्॥ **1.34** ॥ 34

“कन्दर्पोऽयमुपागतो दशरथश्रीपुत्रतादभ्भतः
कन्दर्पारिधनुर्बभञ्ज तदितस्सीता रतिर्देवता।
एनं प्राप्य मुदान्विता भवति से”त्येवं जनानां गिरा
यन्मन्दस्मितमानने तव तदा तत् साम्प्रतं राजते॥ **1.35** ॥ 35

“भग्नं भर्गधनुः, भयं च नृपतेः, चिन्ताऽपि सीताहृदः
कल्याणं च कथं भवेदिति मिथो भाषा जनानामपि”।
इत्येवं नृपसद्मवर्तिवचनं श्रुत्वा मुखे यद् बभौ
तन्मन्दस्मितमेव साम्प्रतमिदं स्वामिन् ! न मे संशयः॥ **1.36** ॥ 36

“प्रालेयाचलकन्यकापतिधनुर्भङ्गाप्तसीतः पुनः
प्रालेयाचलकन्यकापतिमहाभक्तस्य विध्वंसनात्।
प्राप्स्यत्येव हृतां स एष भगवान् साकेतनाथो महान्”
इत्येवं जनकाप्तसन्मुनिवचःप्राप्तस्मितः पाहि नः॥ **1.37** ॥ 37

“सीतासक्तमनास्समागत इमं देशं स पङ्क्त्याननः
चापम्लानतमाननावलिरभूत् भूयश्च तस्यां रतः।
चापेनास्य रघूद्वहस्य भविता कृत्ताननौघः पुनः”
इत्येवं मुनिपङ्क्तिवाग्भिरुदितश्रीमन्दहासः परम्॥ **1.38** ॥ 38

“सीतेयं प्रतिपादिता तव सुता या चोर्मिला लक्ष्मणे
तां कुर्यास्तव सोदरस्य तनये भ्रात्रोस्तथैवानयोः”।
इत्येवं कुशिकात्मजस्य वचसा मन्दस्मितं यत्तदा
सञ्जातं वदने तदेव भगवन्नद्यात्र विद्योतते॥ **1.39** ॥ 39

वंशस्ते कथितो वसिष्ठमुनिना वंशः प्रियायाश्च ते
जानक्या जनकेन तेन कथितस्तस्मिन् विवाहोत्सवे।
श्रुत्वा तत्र च वृत्तमद्भुततमं मन्दस्मितं ते तदा
यज्जातं वडुवूर्विहाररत ! तत् सत्यं ममैतत् पुरः॥ **1.40**॥ 40

स्वेषु भ्रातृषु ते तदा त्रिषु मुदा योषित्समेतेष्वभूत्
चित्ते नृत्तरतोऽमितः परिणये मोदस्सभार्यां प्रभो !
तस्येदं परिवाहतामधिगतं मन्दस्मितं यन्मुखे
तद्धीदं वितनोतु राघव ! परं कल्याणमस्मास्वपि॥ **1.41**॥ 41

"सीतायाः करलालनेन भगवन् ! सन्तुष्टचित्तस्तदा
साकं धर्मरतात्मना भुवि सतां धर्मं करोम्युन्नतम्"।
इत्यन्तः कलयन् बहिर्यदकरोद् मन्दस्मितं तद्भवान्
तत् सङ्क्रीडति साम्प्रतं तव मुखे सम्पश्यतां क्षेमदम्॥ **1.42**॥ 42

मार्गे भार्गवमागतं निजरुषा क्लृप्तां परेभ्यश्शुचं
वर्षन्तं परशुं नितान्तपरुषं स्वांसे वहन्तं तदा।
दृष्ट्वा भीतिमुपागते निजजने राम ! त्वदीयानने
यन्मन्दस्मितमित्थमुत्थितमिदं दद्याद् अभीतिं मम॥ **1.43**॥ 43

"मत्कं नाम वहस्यहो वह परं व्याख्याति तद्दासतां
भग्नं नाम धनुस्त्वया पुररिपोरस्मद्गुरोरप्यहो !"।
इत्थं जल्पति रोषतोऽतिपरुषं मार्गागते भार्गवे
यन्मन्दस्मितमानने तव बभौ तत् किं तथैव स्थितम्?॥ **1.44**॥ 44

"सीतेयं परिरक्षिता दशमुखाद् वेदान्तिराजात्मजा
जाता तेऽनुगुणैव तत्र भवता भग्नं धनुर्मद्गुरोः।
प्राचीनं तदिदं धनुः कुरु तथे"त्येवं ब्रुवाणे मुनौ
यन्मन्दस्मितमानने तव तदा तत्साम्प्रतं दृश्यते॥ **1.45**॥ 45

शैवं तद्धनुरर्चकोऽस्य जनको राजा ततो नो हतः
भग्नं तद्भवता भयं न विशता सोऽयं कुठारो मम।
पश्याद्ये"ति धनुर्ददन्मुनिमणिः यत्प्राह तेनोदितम्
यन्मन्दस्मितमानने तव विभो ! तन्मङ्गलं यच्छतु ॥ **1.46** ॥ 46

आदायाथ धनुस्ततो मुनिमणेरारोप्य वाणं ततः
पश्यन्तं च कुठारमानतमथो दर्पेण दूरीकृतम्।
यन्मन्दस्मितमाततान स भवान् श्रीलक्ष्मणानन्ददं
तन्मे मङ्गलमातनोतु भवतः सम्प्रत्यथो चोज्ज्वलम् ॥ **1.47** ॥ 47

श्रीमन् ! राम ! तुलापुनर्वसुमहे श्रीरामचन्द्रोत्सवे
कल्याणात्मकवेषमञ्जुलतमे श्रीजानकीसंयुते।
श्रीमल्लक्ष्मणपार्श्वगे हनुमति स्तोत्रं नवं तन्वति
स्वामिन् ! यत्तव मन्दमञ्जुहसितं तस्मिन् मनो मुह्यति ॥ **1.48** ॥ 48

कन्दर्पस्य मुहुर्मुहुः निजतनुं सम्पश्यतस्सादरं
तं गर्वं हरतस्तवात्र वड्डुवूर्दिव्यस्थले तिष्ठतः।
मैथिल्या मधुरातिसुन्दरतनुश्रीयुक्तया भूषित -
प्रान्तस्यास्तु मनोहरं स्मितमिदं मन्मङ्गलौघप्रदम् ॥ **1.49** ॥ 49

साकेते जननीजनेन नितरां संलालितस्याथ ते
पित्रा प्रीततमेन रञ्जितहृदः श्लाघ्यैस्तथा भ्रातृभिः।
सर्वैरप्यमितप्रमोदभरितैः सीतासमेतस्य ते
यन्मन्दस्मितमाननेऽत्र वड्डुवूर्वासेऽपि तद्वर्तते ॥ **1.50** ॥ 50

"श्वश्रूर्मे परमं हि दैवतमियं कुक्षावुदीतो भवान्
अस्या मन्नयनान्तरङ्गसुखदो मद्भाग्यतो राजते।
तातो वो मयि वत्सलोऽस्ति सुतराम् आनन्दपूर्णास्म्यहं
श्रीकान्ते"ति विदेहजावचनतः स्मेराननो दृश्यसे ॥ **1.51** ॥ 51

“कौसल्या जननी सतामभिमता श्लाघ्यैर्गुणैर्भूषिता
तातस्सत्यवचाः पराक्रमनिधिः श्रीचक्रवर्ती भुवः।
दक्षाः कर्मसु साधवः प्रियरताः सर्वेऽप्यमी भ्रातरः
श्रीकान्ते”ति विदेहजावचनतस्स्मेराननो राजसे॥ **1.52** ॥ 52

॥ इति बालस्पन्दः समाप्तः ॥

sunder kidāmbi prapatti dot com sunder kidāmbi

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ अयोध्यास्पन्दः ॥

कविताजितकल्लोलिकन्यकाकान्तवक्षसे।
करुणादिगुणाढ्याय कमलानिधये नमः ॥

मन्दोदरीदयितमाथिशराढ्यपाणेः
मन्दाकिनीमधुरमौलिधृतात्मनाम्नः।
मन्दाक्षमन्दितमनोभवविभ्रमस्य
मन्दस्मितं मदघमर्दनमस्तु नेतुः ॥ 2.1 ॥ 53

“राम ! त्वय्यतिवत्सलाः प्रकृतयो मय्यायतेयं जरा
साकेताधिपतिं समस्तजगतां कुर्वे पतिं त्वामतः”।
एवंवादिनि तत्र नाम जनके श्रीजानकीनाथ ! ते
यन्मन्दस्मितमानने समभवत् तद्दर्शयस्यद्य किम् ? ॥ 2.2 ॥ 54

त्यक्त्वा राम नदीपवस्त्रविभवं भूमण्डलं त्वं वनं
यातस्त्वामवने विधातुमकरोच्छ्रीमान् वसिष्ठो मुनिः।
एतां नूतनवस्त्रवैभवयुतां दीपावलीं मामिकां
वाचं नाम निशम्य किं वितनुषे मन्दस्मितं मत्प्रभो ! ॥ 2.3 ॥ 55

मन्दस्मितं वर्णयितुं प्रवृत्तो
ममेति मध्ये विषयैकलोलः।
मन्देति मां प्रेक्ष्य विभो ! विधत्से
मन्दस्मितं मण्डनमाननस्य ॥ 2.4 ॥ 56

पितुर्वचसि न स्थितः पितृमतेऽपि नो वर्तसे
महत्सु विनयो न ते परमयं विरुद्धस्ततः।

प्रसक्तिरपि वाञ्छिता मम पुनः कवे ! कामदा
त्विति स्मितमहो मितं वितनुषे परीवाहतः ॥ 2.5 ॥ 57

“सतीं भरतमातरं कलुषितान्तरां कुब्जया
विधातुमभिराधितां प्रियसुतं वितेने वने”।
इति श्रुतिमुपागता पुरजनस्य वाणी विभो !
मितस्मितमसौन्मुखे तदिदमस्तु मन्मानसे ॥ 2.6 ॥ 58

“तातादस्मि गरीयसी तव सुत ! त्वं न प्रयाया वनं
वत्सात्र स्थित एव नन्दय मनो मत्कं वचस्सत्कुरु”।
इत्थं मातरि लक्ष्मणे च वदति स्नेहाच्च कोपादपि
त्वं मन्दस्मितमेतदेव कलयन् तौ सान्त्वयामासिथ ॥ 2.7 ॥ 59

स्त्रियं पुरुषविग्रहं मम पिता विदेहाधिपः
भवन्तमधिगत्य मां रघुपते ! करे तेऽकरोत्।
इतीदमवनीसुतावचनमानने ते स्मितं
ततान तदिदं स्मितं मदवनं विधत्तां प्रभो ! ॥ 2.8 ॥ 60

मनागिव मनो मम त्वयि कृतं त्वया नीयते
परत्र तदपि प्रभो ! किमिति युक्तमेतत्तव ?।
अथ त्रिजटनीतितस्तदिति मन्दमेतत्स्मितं
सुमन्दमभिपातु मामिह दयानिधे ! राघव ! ॥ 2.9 ॥ 61

कौशेयोपरि चीरवन्धनविधौ जायावलग्नस्थले
कोशादाहृतभूषणेऽपि च तदा वाचा पितुस्तज्जने।
यन्मन्दस्मितमाततान वदनं रक्तं तवेदं प्रभो !
तद्युक्तं वटुवूर्स्थलेऽपि मयि तन्नीचेऽवरेऽप्युत्तमे ॥ 2.10 ॥ 62

“द्रष्टा त्वामभिषिक्तमिन्दुवदनं चित्रेन्दुना साम्प्रतं
श्वो वत्सेति तथैव केकयसुतावाचा न याया वनम्”।
इत्येवं पितरि ब्रुवत्यपि बभौ मन्दस्मितं यत्समं
तन्मे साधुवदास्थिताय सुतरां दुष्टाय च द्योतते ॥ **2.11** ॥ 63

स्वामिंस्ते भवने पितुस्सुखमये प्रीतैर्जनैस्संवृते
मातृप्रीतिवहे तथैव तमसातीरेऽप्यधस्तात् तरोः।
शोकार्तैस्स्वजनैः वृतेऽपि परितो मन्दस्मितं यत् समं
वक्त्रे ते तदिदं तथैव वडुवूर्गेहेऽपि विद्योतते ॥ **2.12** ॥ 64

गङ्गातीरसमागतेन सुहृदा सास्रेण “साकेतवत्
देशोऽयं तव सर्वमानवमणे ! राजाऽत्र तत्त्वं भव”।
इत्थं नाम गुहेन भक्तिनिधिना प्रोक्तस्य यत्ते मुखे
तन्मन्दस्मितमेव साम्प्रतमिदं विद्योतते नः पुरः ॥ **2.13** ॥ 65

गुहेन गहने तदा बहुविधं समभ्यर्चितः
“वसेह तव ते वयं सततदासभूताः प्रभो !”।
इति स्तुतवता मुखे यदभवत्सुमन्दस्मितं
तदेतदतिसुन्दरं तव ददातु मे मङ्गलम् ॥ **2.14** ॥ 66

“वासं वाञ्छसि कानने न तु पुनः प्रान्ते मम त्वं ततः
श्रीमन् ! मद्गुरुसन्निधौ वस सुखं श्रीचित्रकूटे गिरौ”।
एवं नाम मुनेः प्रयागवसतेः हृद्या गिरः शृण्वतः
स्वामिन् ! राम ! तवानने यदभवद् मन्दस्मितं किंन्विदम् ? ॥ **2.15** ॥ 67

“वध्यो मे भरतस्समागत इतो” “मैवं हि नेतुं पुरीम्
आवामागत इत्यवेहि, यदि ते राज्यस्पृहा दास्यति”।
इत्थं लक्ष्मणमुत्तरेण वचसा साकूतमाव्रीडयन्
यन्मन्दस्मितमातनोस्तु भगवन् ! तत्त्वन्मुखे जृम्भते ॥ **2.16** ॥ 68

"साकेते वस राज्यपालनपरो" "वाक्यं पितुस्तत् कथं" ?
"सोऽहं तद्विपिने वसामि" "तदिदं युक्तं न" "तत्पादुकाम्।
देही"त्यर्थयति प्रिये तु भरते मन्दस्मितं यन्मुखे
तत्ते श्रीवडुवूर्निवास ! सुभगं विद्योतते साम्प्रतम् ॥ 2.17 ॥ 69

"नीता श्रीभरतेन पादकमलत्राणे रता पादुका
तत्कार्यं कलयामि साऽहमि"ति या सम्प्रस्थिता स्वाग्रतः।
तां सीतामवलोक्य तत्र दयितां यत्ते मुखे सम्बभौ
तन्मन्दस्मितमेव साम्प्रतमिदं तस्यास्समीपावनौ ॥ 2.18 ॥ 70

अत्रेराश्रमतस्समागतवतीम् आलोक्य सीतां सतीं
पत्न्यास्तस्य मुनेस्तपःफलमयैः दिव्याङ्गरागादिभिः।
भूयो भूषितविग्रहां भगवतीं मन्दस्मितालङ्कृतां
यन्मन्दस्मितमानने तव बभौ तत्सत्यमेतत् प्रभो ! ॥ 2.19 ॥ 71

॥ इति अयोध्यास्पन्दः समाप्तः ॥

sunder prapatti.com sunder kidambi

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ अरण्यस्पन्दः ॥

कवितजितकल्लोलिकन्यकाकान्तवक्षसे।
करुणादिगुणाढ्याय कमलानिधये नमः॥

सिंहान् हन्त ! गजान् खरानपि मृगान् शूले विधायोद्वहन्
आयातः पुरतो वनेऽति गहने तिष्ठन् विराधोऽब्रवीत्।
"त्यक्त्वैनां प्रमदामिमां मयि युवां यातं द्रुतं जीवने
वाञ्छा चे"दिति तन्निशम्य भवतो वक्त्रे नु मन्दस्मितम्॥ 3.1 ॥ 72

तामादाय वहन् शरेण भवता सन्ताडितस्तां भुवि
त्यक्त्वा वामवहत् तदा च स भवान् लब्धोऽद्य वाहो महान्।
इत्येवं हृदि चिन्तयन् यदतनोत् सौमित्रिणा संयुतः
तन्मन्दस्मितमेव साम्प्रतमिदं सन्दृश्यते भाग्यतः॥ 3.2 ॥ 73

"इदानीमिन्द्रो मां सपरिजन आहैत्य परमं
मुने ! याहि ब्राह्मं सदनमिति तं चावदमहम्।
अमुं रामं दृष्ट्वे"त्यनघशरभङ्गस्य वचसा
मुखे जातं मन्दं स्मितमवतु ते श्रीरघुपते !॥ 3.3 ॥ 74

श्रीमन् ! राम ! तवागमेन मुदिते तस्मिन् सुतीक्ष्णे मुनौ
तत्तत् सम्भ्रमतो विधाय रजनीकामाद् विलम्बान्विते।
भुक्तिं दातुमये ! तदा रघुपते ! धर्मात्मनस्ते मुखे
यन्मन्दस्मितमुत्थितं तदवतु स्वामिन्नधर्मादिमम्॥ 3.4 ॥ 75

"त्रयो दोषाः कुर्युः पुरुषमिह कल्याणरहितं
त्वयि स्वामिन् ! दोषौ नहि परमथैको विजयते।

स हेयस्तच्चापं त्यज रमण ! नाथे”ति दयिता -
गिरं श्रुत्वा मन्दस्मितमुदितमेतत् किमु विभो ! ॥ **3.5** ॥ 76

“जह्यां जीवितमप्यहं प्रियतमे ! त्वां वा तथा लक्ष्मणं
नैव ब्राह्मणसन्निधौ विरचितां सीते ! प्रतिज्ञामिमाम्” ।
इत्युक्त्वा सुहितां हितामपि च तां सम्पश्यतस्ते विभो !
यन्मन्दस्मितमाविरास तदिदं मां पातु पापात् कलेः ॥ **3.6** ॥ 77

“स्त्रियस्सर्वा लोके चपलमतयस्साधुपथतः
स्खलन्त्यस्सन्दृष्टाः पतिमपि धनानां निधिमपि ।
त्यजन्त्यस्सेयं ते भवति न तथा भाति सुगुणा
सती”त्येवं वाचा घटभवभुवा ते स्मितमिदम् ॥ **3.7** ॥ 78

“तातस्याहं वयस्यः तव मम हृदयं पुत्रके मामके स्यात्
यद्वत्तद्वन्निविष्टं वस मम सविधे प्राणतोऽपि प्रियं ते ।
कुर्या वत्से”ति गृध्रक्षितिपतिवचसा राम ! यत्ते मुखाब्जे
जातं मन्दस्मितं यद् मदवननिपुणं राजते साम्प्रतं तत् ॥ **3.8** ॥ 79

दृष्ट्वा पञ्चवटीस्थले विरचितां स्वां पर्णशालां नवां
निर्मातारमवेक्ष्य लक्ष्मणमथो “वृत्तो न तातो मम” ।
इत्युक्त्या सह मन्दहास उदितो यस्ते मुखे मत्प्रभो !
सोऽयं पातु शुभश्शुभानि नितरां संवर्धयन्नस्सदा ॥ **3.9** ॥ 80

आयातां दशकन्धरस्य सहजामादाय मूर्तिं नवाम्
आश्लेषस्पृहया सुबाहुयुगलाम् आनन्दपूर्णाननाम् ।
“एतां सन्त्यज मां भजातिमधुरा”मित्यालपन्तीं तदा
दृष्ट्वा यस्तव मन्दहास उदितस्सोऽयं भयं मे द्यतु ॥ **3.10** ॥ 81

आनीताननया नयाध्वविगतान् तान् यातुधानान् अहो !
घोरास्त्रायुधजातरोषपरुषान् नानाविधान् भीकरान्।
दृष्ट्वा राघव ! ते मुखे यदभवद् मन्दस्मितं मङ्गलम्
तत् सत्यं मम मङ्गलाय महते विद्योततेऽद्यापि किम् ? ॥ **3.11** ॥ 82

“सर्वेऽमी रजनीचरा विनिहता राम ! त्वया दुर्बलाः
मामासाद्य मया हतोऽद्य सदने मृत्योस्सुखं वत्स्यसि”।
इत्येवं खरभाषितं खरतरं श्रुत्वा रघूणां पते !
यन्मन्दस्मितमानने तव बभौ तत् साम्प्रतं द्योतते ॥ **3.12** ॥ 83

नानारत्नमयं विलोक्य पुरतो धावन्तमत्यद्भुतं
“स्वामिन् ! कान्तममुं गृहाण हरिणं क्रीडाविनोदाय मे”।
इत्येवं जनकात्मजावचनतो मन्दस्मितं यन्मुखे
सञ्जातं तव रामभद्र ! वडुवूर्वासिन् ! तदेतत् किमु ? ॥ **3.13** ॥ 84

“मारीचो न मृगोऽयमार्य ! भवता हन्तव्य एवाधुना
जीवन्न ग्रहणं समेष्यति महामायाविनामग्रणीः”।
इत्येवं किल लक्ष्मणस्य वचसा मन्दस्मितं यद्बभौ
स्वामिन् ! राम ! तदेतदत्र भवतस्सन्दृश्यते साम्प्रतम् ॥ **3.14** ॥ 85

धावन्तं परमाद्भुतं भुवि दिवि प्रास्तप्रभं कानने
लीनं तत्र च तत्र चाथ च ततस्सन्दृश्यमानं बहिः।
दृष्ट्वा तं हरिणं स्फुरन्तमभितः सौन्दर्यपूर्णाकृतिं
यन्मन्दस्मितमानने तव विभो ! जातं तदेतत् किमु ? ॥ **3.15** ॥ 86

तादृक्षे निहते मृगेऽथ सहजे सीतां विहायागते
सीताया हरणे जटायुषि गते शोकानुभूतिं तथा।
अर्चायां तु विचिन्त्य तत्समुदितं मन्दस्मितं यत्प्रभो !
तन्मे दूरमपाकरोतु दुरितं सीतासमेतस्य ते ॥ **3.16** ॥ 87

“आरम्भो हि शुचो दशास्यसहजानासापुटाकृन्तनं
तन्नाशाय निकृन्तनं त्विदमभूदायोमुखीयं प्रभो !”।
इत्युक्त्या सहजस्य ते समभवद् मन्दस्मितं यन्मुखे
तत्सत्यं वडुवूर्‌निवास ! भगवन् ! सन्दृश्यते साम्प्रतम्॥ **3.17** ॥ 88

बाहू तौ बहुयोजनौ न हि शिरो वक्त्रं तु कुक्षौ महत्
त्वेनं नाम तथा विलोक्य विपिने क्रूरं कबन्धं प्रभो !।
यन्मन्दस्मितमानने समभवत् सौमित्रियुक्तस्य ते
तत्सत्यं वडुवूर्‌निवास ! भगवन् ! सन्दृश्यते साम्प्रतम्॥ **3.18** ॥ 89

कृत्वा तं च निकृत्तबाहुमवटे निक्षेपणानन्तरं
गन्धर्वेण च तेन तत्समुदितं सुग्रीवसख्यं तथा।
श्रुत्वा यन्मुखपङ्कजे समभवत् सीतापते ! ते स्मितम्
तत् सत्यं वडुवूर्‌निवास ! भगवन् ! सन्दृश्यते साम्प्रतम्॥ **3.19** ॥ 90

दृष्ट्वा तां शबरीं फलानि भवते दातुं तपः कुर्वतीं
भूयो भक्तिमतीं गुरुष्वतितरामानन्दपूर्णाशयाम्।
वृद्धां वेपथुनर्तनां द्रुतहृदं मन्दस्मितं यन्मुखे
सञ्जातं तव गृध्रराजगतिद ! स्वामिन् ददातु श्रियम्॥ **3.20** ॥ 91

दृष्ट्वा तत्र तया प्रदर्शितमहो
स्वाचार्यपूजार्पितम्
अम्लानं सुमसञ्चयं जलनिधीन्
सप्तापि तत्र स्थितान्।
आनीतान् गुरुभिः प्रभावमहितैः
मन्दस्मितं यन्मुखे
स्वामिन् ! श्रीवडुवूर्‌निवास ! भगवन् !
श्रीराम ! तद्दृश्यते॥ **3.21** ॥ 92

तद्वृत्तानि परीक्ष्य तानि मधुराणीति प्रभुज्य प्रभो !
भुक्त्वा वन्यफलानि तां जिगमिषुं स्थानं गुरूणां ततः।
प्रत्यक्षं ज्वलने समर्पिततनुं दृष्ट्वा तवास्याम्बुजे
यन्मन्दस्मितमुत्थितं रघुपते ! तद्भाति सत्यं पुरः॥ **3.22** ॥ 93

॥ इति अरण्यस्पन्दः समाप्तः ॥

sunder kidāmbi
prapatti dot com
sunder kidāmbi

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ किष्किन्धास्पन्दः ॥

कविताजितकल्लोलिकन्यकाकान्तवक्षसे।
करुणादिगुणाढ्याय कमलानिधये नमः॥

पम्पातीररुहान् तरून् गगनगान् शाखामृगावेक्षया
दृष्ट्या हन्त ! समीक्ष्य लक्ष्मणयुजः ते गच्छतोऽग्रे नतम्।
सुग्रीवात् समुपागतं पवनजं दृष्ट्वा तदुक्तश्रुतेः
यन्मन्दस्मितमानने लघु बभौ सत्यं तदेतत् प्रभो ! ॥ 4.1 ॥ 94

वायोरात्मभुवो नतस्य नितरां तस्याथ तामद्भुतां
श्रुत्वा नाम गिरं सुवर्णमहितां सुष्ठूदितां सुस्वराम्।
सत्यं दिव्यसुधोपमां सुमहितां श्रीराम ! मन्दस्मितं
यत्ते नाम मुखाम्बुजे समभवत् तत् सत्यमेतत् प्रभो ! ॥ 4.2 ॥ 95

नीतस्याथ निजान्तिकं तव विभो ! वातात्मजातेन तं
सुग्रीवं नयनाग्रतः कलयतः मित्रं च मित्रात्मजम्।
तद्वृत्तं च यथातथं श्रुतवतो यन्नाम मन्दस्मितं
सञ्जातं वदनाम्बुजे तदिदमित्यानन्दवानस्म्यहम्॥ 4.3 ॥ 96

कायं क्षिप्तवतः सुदूरमपि ते स्वाङ्गुष्ठतो दुन्दुभेः
“प्रत्यग्रं हि समांसमेतदभवत् क्षिप्तं पुरा वालिना”।
इत्युक्त्या रविसम्भवस्य सुहृदो मन्दस्मितं यन्मुखे
सञ्जातं तव तन्ममाद्य पुरतो विद्योतते राघव ! ॥ 4.4 ॥ 97

सालान् सप्त तथा धरामपि शरेणैकेन भेत्तुः पुरा
पादाब्जे तव मस्तकं कृतवतः ते शंसतो विक्रमम्।
विस्रब्धस्य भृशं विलोक्य सुहृदः मोदोदितं चेष्टितं
यन्मन्दस्मितमानने तव बभौ तत्सत्यमेतत् प्रभो ! ॥ **4.5** ॥ 98

सुग्रीवेण समीरितां शुभवतीं श्रुत्वा कथामद्भुतां
श्रीमत्सप्तजनाश्रमस्य भवतः प्रीत्या नमस्कुर्वतः।
यन्मन्दस्मितमानने समभवत् तत्सत्यमेतत् प्रभो !
तत्ते सौतु सुखानि पूर्वपुरुषानत्या समुत्थानि मे ॥ **4.6** ॥ 99

एकेनैव शरेण पातितवतः ते वालिनं तद्गिरा
सन्निन्दाकुलया तथाधिकतया न्यायादपेतात्मना।
यन्मन्दस्मितमानने तव बभौ धर्मस्वरूपाश्रये
दीनानाथशरण्य ! दैवतमणे ! स्वामिन् ! सुखायास्तु नः ॥ **4.7** ॥ 100

हृद्यैर्वाद्यगणोदितैः करकृतैः स्त्रीणां च गीत्यादिभिः
जातैः श्रोत्रसुखैः निनादनिवहैः दीव्यन्तमन्तः पुरे।
सुग्रीवं सुहृदं विलोक्य भगवन् ! मन्दस्मितं यन्मुखे
तन्मे सौतु सुखं परं रघुपते ! दीनावनैकव्रत ! ॥ **4.8** ॥ 101

अन्तर्दुःखचयं वहन्नपि भवान् पृक्तं सुहृत्सौख्यतः
मोदं कञ्चन संवहन् यदकरोः मन्दस्मितं मञ्जुलम्।
तत्ते राघव ! किञ्चनातिसुभगं सौजन्यमन्यादृशम्
मान्यं दर्शयतीति तत्र रमते सर्वोऽप्यभिज्ञो जनः ॥ **4.9** ॥ 102

"तूष्णीमेष सुरानुभूतिनिरतः कामं कृतघ्नः कपिः
नैव त्वामुपकारकं स्मरति तद्वाल्यन्तिकं गच्छतु"।
इत्थं लक्ष्मणभाषिते "न हि तथा कोपो विधेयः पुरः
सान्त्वं ब्रूहि सखे"ति ते सुवचसा मन्दस्मितं शोभते ॥ **4.10** ॥ 103

आनीतं कपिभिः कृताञ्जलिपुटैः सङ्ख्यातिगैर्भीकरैः
शत्रूणां धरणीतलं निखिलमप्याच्छादयद्भिस्तदा।
सुग्रीवं सुहृदं समीक्ष्य सुभगं सुप्रीतचित्तस्य ते
यन्मन्दस्मितमानने समभवत् तत्साम्प्रतं दृश्यते॥ **4.11** ॥ 104

“स्वामिन्! सैन्यं त्वदीयं कपिकुलवलितं भल्लबृन्दावृतं सद्
रक्षोविक्षेपदक्षं चरणसविधगं वर्तते वाक्प्रतीक्षम्”।
इत्येवं सूरसूनौ कथितवति मुखे तावके ताटकारे!
जातं मन्दस्मितं यत्तदिदमिति भवान् दर्शयत्यन्तरङ्गम्॥ **4.12** ॥ 105

“प्राचीं गच्छेत यूयं” “तदनु पवनभूरङ्गदाद्यैस्समेतः
मत्भ्रातुर्धर्मदृष्टेः दिश”मिति शुभया श्रीदिनाधीशसूनोः।
वाचा सद्यो मुखे ते नवकमलनिभो यो बभौ मन्दहासः
तत्त्वं सीतापते! मे निरवधिकदयो दर्शयस्यद्य सत्यम्॥ **4.13** ॥ 106

दत्वा मारुतनन्दनस्य करयोः रत्नाङ्गुलीयं शुभं
दृष्ट्वा तस्य नतस्य मस्तकतलं सीतादृशोरास्पदम्।
यन्मन्दस्मितमाततान स भवान् तन्मङ्गलं मत्पुरः
भूयो दर्शयति स्वयैव दयया तादृक्षयाऽमेयया॥ **4.14** ॥ 107

आदायाङ्गुलिभूषणं स हनुमान् कृत्वा शिरोभूषणं
बद्ध्वा चेलमुखे भवन्तमपि तं नत्वा मुहुस्सादरम्।
साकं स्वैरगमद्दिशं निजपितुः सौम्यस्य लीलापदं
तद्दृष्ट्वा वदने तदा यदभवद् मन्दस्मितम् तेऽद्य तत्॥ **4.15** ॥ 108

“ऐष्यत्येष मम प्रियां जनकजां चामीकराङ्गीं सतीम्
नीलाम्भोजदलातिरम्यनयनां नासाभिरामाननाम्।
दृष्ट्वा मञ्जुलमन्दहासमधुरां वाणीसुधावर्षिणीम्”
इत्यन्तस्तव कुर्वतो हि यदभूद् मन्दस्मितं तत्पुरः॥ **4.16** ॥ 109

मार्गे गच्छतु विघ्नगन्धरहितः धून्वन् परान् विक्रमैः
रक्षस्सङ्घविमर्दनो गिरिरिव प्राप्तप्रचारो महान्।
दृष्ट्वा तामसितेक्षणां मधुरया वाण्या तया नन्दितः
सोऽयं मामभिनन्दयत्विति हृदि ध्यातुर्मुखेऽभूत् स्मितम्॥ **4.17**॥ 110

"सर्वे दिक्षु गताः परासु कपयः प्रत्यागतास्साम्प्रतं
नामी दक्षिणदिग्गताः हनुमता युक्तास्ततस्ते ध्रुवम्।
द्रक्ष्यन्त्येव सुतां विदेहनृपते"रित्युत्थितं मोदतः
सुग्रीवाद्वचनं निशम्य भवतो मन्दस्मितं वर्धते॥ **4.18**॥ 111

॥ इति किष्किन्धास्पन्दः समाप्तः॥

sunder kidāmbi prapatti dot com sunder kidāmbi

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ सुन्दरस्पन्दः ॥

कविताजितकल्लोलिकन्यकाकान्तवक्षसे।
करुणादिगुणाढ्याय कमलानिधये नमः॥

“आयाता मधु भक्षयन्ति विपिने तत्पालकैर्वारिताः
तानेतान् नितरां प्रहृत्य मुदिताः क्षीबाः स्थितास्ते वने”।
तच्छ्रुत्वा “हनुमान् विदेहतनयां दृष्ट्वाऽऽगतस्स्या”दिति
श्रीसुग्रीवगिरा भवद्वदनतो मन्दस्मितं वर्धते॥ 5.1 ॥ 112

आयातेषु समेषु तेषु कपिषु श्रीमत्सु तैरग्रतः
सानन्दाश्रुभिरुत्सुकैरतितरां आप्तं विलोक्याननम्।
श्रीमन्मारुतसम्भवं निजमुखे विद्योतमानश्रियम्
यत्ते राम ! मुखाम्बुजे समभवद् मन्दस्मितं तत्पुरः॥ 5.2 ॥ 113

“दृष्टा काऽपि पतिव्रता कुलमणी रामोत्तमा राम ! ते
मूर्तिं मानसपङ्कजे विदधती श्रीराम ! रामेति च।
नाम स्वाननपङ्कजे दिशि तव श्रीनेत्रपद्मे सदे” -
त्युक्त्या वायुसुतस्य जातमयि ! ते मन्दस्मितं द्योतते॥ 5.3 ॥ 114

“इतो यातुर्मार्गे किमभवदतो यातुगणतः
पुरे वा सा दृष्टा कथमिव किमाहाथ मधुरा ?”।
इति त्वत्पृच्छातो हनुमति तदाऽऽसीन्मुखरुचिः
ततस्स्वामिन् ! वक्त्रे तव च मधुरं मन्दहसितम्॥ 5.4 ॥ 115

“भवद्दृष्ट्या हृष्टो विपिनभुवमालोक्य निखिलां
सुपार्श्वं त्वां कर्तुं जनकसुतया वालितनयः।

सुपार्श्वं मांसादं करहतकपोलं समवधीत्”
इति श्रुत्वा वाचं तव हनुमतो मन्दहसितम्॥ 5.5॥ 116

“मैनाको गिरिराट् पयोनिधिजलाद् उत्पत्य मामादरात्
श्रीरामप्रियदूत ! वातभव ! हे ! विश्रम्य किञ्चिद्व्रज।
इत्युच्चैरवदत् प्रभो ! रघुपते ! नाथे”ति वाचा कपेः
यन्मन्दस्मितमानने तव बभौ तन्मे विधत्तां सुखम्॥ 5.6॥ 117

“माता नागकुलस्य साऽथ सुरसानाम्नी सुरैः प्रेरिता
त्वामास्यान्तरये ! निधाय सुभगं श्रीरामदूतं मनाक्।
विश्रान्तं विसृजामि हे त्युपगते”त्युक्त्वा मुदा पावनेः
यन्मन्दस्मितमास ते रघुपते ! तन्मे विधत्तां मुदम्॥ 5.7॥ 118

अयं वक्ता न स्यान् निजरचितकार्यस्य नियतं
ततस्तत् स्वार्चायां विहितवड्डुवूर्गेहवसतिः।
शृणोमि श्रीवाचा जनकतनयाया अहमिमां
विधायाङ्के हेति स्वयमरचयो मन्दहसितम्?॥ 5.8॥ 119

“स्वामिन्नेष पराक्रमं निजमनाधृष्यं परैर्वर्णितं
नैव स्वीयगिरा वदेद्विनयवान् स्वोत्कर्षवादे जडः।
साऽहं वच्मि तदार्यपुत्र ! भगव”न्नित्यात्मकान्तागिरा
यत्ते राघव ! मन्दमास हसितं तन्मञ्जुलं पातु माम्॥ 5.9॥ 120

तथा वासं कृत्वा सुभगवड्डुवूर्देशसदने
हनूमत्यग्रस्थे जनकतनयामञ्जुवचसा।
हनूमत्कार्याणां गतिमयि ! निशम्यातिमहतां
मुखे मन्दं हासं कलयसि रघूत्तंस ! किमिदम्?॥ 5.10॥ 121

“किं दृष्टं गदितुं भवत्यतितराम् उत्कण्ठिता वर्तते?”
“नो दृष्टं, श्रुतमाप्ततो निजमनस्तर्केण चावेक्षितम्”।
इत्युक्तिप्रतिवाग्विहारभवया श्रीजानकीसद्गिरा
जातं ते मुखपङ्कजे विजयते मन्दस्मितं मञ्जुलम्॥ **5.11**॥ 122

“नायं जानकि! केवलं कपिरहो त्वत्सम्पदर्थं दिवः
भूमौ नाम कृतावतारविभवः श्रीविष्णुरेव स्वयम्”।
इत्येवं सरमा सखी मम तदा साऽऽहेति सीतागिरा
राम! त्वद्वदने यदेतदभवद् मन्दस्मितं पातु माम्॥ **5.12**॥ 123

“मैनाकेन गिरीश्वरेण महितस्सोऽयं हनूमान् कपिः
मध्येमार्गमनन्तविक्रमनिधिर्यातो गिरा मैथिलि!।
आगत्यात्र तवानने मुदमधा”दित्याह सा मे सखी
स्वामिन्नित्यवनीसुतामुखगिरा मन्दस्मितं भाति ते॥ **5.13**॥ 124

“आगच्छन् पथि वेगतस्सुरसया रुद्धो महावक्त्रया
ह्रस्वस्सन् नितरां प्रविश्य वदनं तस्या बहिर्निर्गतः।
तेनातीव मुदा प्रशस्य विजयी स्या इत्ययं प्रेषितः
सीते!” हेति गिरा विदेहनृपतेः पुत्र्या तवेदं स्मितम्॥ **5.14**॥ 125

“पारावारपयोविहारनिरता घोराकृतिस्सिंहिका
सर्वावध्यतनुस्समस्तजनताभीतेस्सदा वर्धनी।
या साऽनेन हता विचित्रमिति यच्छंसन्ति सिद्धास्समे
देवीत्याह सखी”त्युदारवचसा मन्दस्मितं ते बभौ॥ **5.15**॥ 126

“लङ्कैवामितविक्रमा हनुमता साऽनेन घोराकृतिः
तत्सन्ताडनरोषितेन तदपि स्त्री चेति लघ्वाहता।
भूमौ सम्पतिता जिताऽस्मि विश तत् सर्वं जयेत्यब्रवीत्”
इत्येवं सरमाऽगदीदिति भुवः पुत्र्याः गिरा किं स्मितम्?॥ **5.16**॥ 127

“रात्रावेष समस्तमेव नगरं सम्यक् विचित्यागतः
प्रातर्मैथिलि ! तावकं वनमिदं तत्राऽपि तं रावणम्।
दृष्ट्वा तर्जनतत्परं तदनु ते वृत्तं रघूणां जगौ”
इत्येवं सरमाऽब्रवीदिति गिरा पुत्र्या भुवोऽभूत् स्मितम्॥ **5.17**॥ 128

“राजाऽभूद्रथवाजिकुञ्जरयुगित्यारभ्य कर्णामृतं
श्रीमानेष ववर्ष मारुतसुतो युष्मच्चरित्रं शुभम्”।
इत्थं श्रीजनकात्मजासमुदितं श्रुत्वा वचस्ते मुखे
यन्मन्दस्मितमुत्थितं सुमधुरं तत् पातु मां पापतः॥ **5.18**॥ 129

“सोऽयं शाखावलम्बी तव खलु चरितं भक्तिमान् रञ्जयन् मां
सङ्क्षिप्तं क्षिप्तदोषं श्रुतियुगसुखदं पावनं पावमानिः।
सानन्दं प्राह मन्द्रं स्मृतमपि जनयत्यन्तरानन्दबृन्दम्”
सीतावाचेति जातो जयति तव मुखे मन्दहासो मनोज्ञः॥ **5.19**॥ 130

“श्रुत्वाप्येवमतीव भक्तिसहितं दृष्ट्वाऽपि बद्धाञ्जलिं
शङ्का मे स दशास्य एव कपितां एवं वहन्नागतः।
इत्यासीदथ तां व्यपोह्य वचनैः मुद्रामिमां सन्ददौ”
इत्येवं जनकात्मजावचनतो मन्दस्मितं ते बभौ॥ **5.20**॥ 131

“मुद्रां दत्वा त्वदीयां मम खलु वदने मुद्रितं हन्त ! हासं
सद्योजातं वितेने नयनयुगगतं शोकबाष्पं च चित्रम्।
तादृक्षानन्दबाष्पं मम दयित ! तदे”त्यब्रवीत् जानकी यत्
तस्माज्जातं स्मितं ते जयति रघुपते ! मन्दमेतन्मनोज्ञम्॥ **5.21**॥ 132

“पृष्टस्सोऽयं हनूमान् कथय रघुपतेरङ्गसौन्दर्यलक्ष्मीं
सौमित्रेरप्युदारेत्यकथयदुदितं मोदबाष्पं विकीर्य।
भूमिं शुद्धां वितन्वन्नपि मम जननीं तापहीना”मितीमां
वाणीं श्रुत्वा प्रियायास्तव मुखकमले मन्दहासस्समिन्धे॥ **5.22**॥ 133

“रामः पद्मसमानलोचनयुगः गण्डद्वयादर्शवान्
नासा निर्जितचम्पकोऽतिमधुरं बिम्बाधरं संवहन्।
एतामङ्गुलिमुद्रिकां मम करे कृत्वाऽवदत्स्वक्षरं
वैदेही”ति गिरा प्रियामुखजया मन्दस्मितं तेऽभवत्॥ 5.23॥ 134

“ऐष्यत्यत्र कथं स मे प्रियतमो?” “मत्पृष्ठतः” “ते परे?”
“मत्तस्ते महितास्समेऽपि यदहं तत्रावरः प्रेषितः”।
इत्येवं मम चास्य चाप्यभवताम् उक्ती प्रभो! राम! भो!,
इत्युक्त्या जनकात्मजामुखजया जातं तवेदं स्मितम्॥ 5.24॥ 135

“त्वां नेष्यामि तदन्तिकं जनकजे! पृष्ठं समारुह्यतां”
“मैवं सर्वनिशाचरान् निजशरैः हत्वा नयेदेष माम्”।
इत्युक्तेः मम सारवित् पुलकितो जातो हनूमानिति
श्रीसीतावचनेन जातमयि! ते मन्दस्मितं शोभते॥ 5.25॥ 136

“दूतः कोपि कपिर्महान् रघुपतेरागत्य सीतामुदं
रक्षस्सङ्घवधं विधास्यति तथा वह्निं च लङ्कापुरे”।
इत्येवं त्रिजटा यदाह भगवन्! स्वप्नं विलोक्याद्भुतं
जातं तच्च तथे”ति दारवचनात् जातं नु मन्दस्मितम्॥ 5.26॥ 137

“सर्वा उग्रवचो विहाय शरणं याचध्वमेतां सतीं
सीतामित्युदितेन मां परवशां चक्रे तदा मत्सखी।
मान्या श्रीत्रिजटे”ति दारवचसा मन्दस्मितं यत्प्रभो!
सञ्जातं वदने तदेतदनघं सर्वां ददातु श्रियम्॥ 5.27॥ 138

“तेनैवाहमहो! ततो हनुमतस्तासां वधं काङ्क्षतः
तास्सर्वा अभिरक्षिता क इव नो नैवापराद्धा जनः?।
स्वामिन्! साहमपि प्रभो! ननु तथा श्रीलक्ष्मणस्यान्तिके
नाथे”त्येवमवेत्य दारहृदयं साकूतमन्दस्मितम्॥ 5.28॥ 139

“प्राज्ञोऽयं हनुमान् मया ह्यभिहितं श्रुत्वा विहायात्मनः
सद्यः कोपमवारणीयमभवत् कामं प्रसन्नाशयः।
एवं ये द्विषदन्तिकेऽपि सुहृदस्ते माननीया” इति
श्रीसीतावचनेन ते समुदितं मन्दस्मितं पातु माम्॥ 5.29॥ 140

“अल्पीयानसि वोढुमिच्छसि च मां तत्ते कपित्वं स्फुटं”
“मा मा पश्य तदद्य रामदयिते ! मत्कं महत्त्वं पुरः”।
इत्युक्त्वा गिरिसन्निभोऽयमभवत् श्रीमान् हनूमानिति
श्रीसीतावचनेन मन्दमिह ते जातं स्मितं शोभते॥ 5.30॥ 141

“मन्दो हासस्तव च हनुमान् द्वौ समावेव सत्यं
मन्दोऽमन्दो भवति तनुतो माननीयो हनूमान्”।
एवं वाचा जनकतनयाजातया जायमानः
मन्दो हासस्तव रघुपते ! माममन्दं विधत्ताम्॥ 5.31॥ 142

मन्दो हासः मनुकुलपतेरञ्जनायाः कुमारः
येन श्रीमान् भवति हनुमान् दर्शनीयो जनानाम्।
धत्ते लीलाः पवनसविधे तेन संस्पृष्टगात्रः
भूयो योऽयं जनकतनयाऽऽनन्दसन्दोहदायी॥ 5.32॥ 143

इत्थं रामो वहति वदने वातजातं वरेण्यं
रामो रामो विभुरिति मुखे वातजातश्च रामम्।
अन्योन्यं तावितिकृतमती प्रीतिमन्तौ महान्तौ
अन्तस्सक्तावनुपमतमौ सम्पदं सन्दिशेताम्॥ 5.33॥ 144

मन्दो हासो मनुकुलपते ! मारुतस्यात्मजातः
मानातीतस्वरसललितः माननीयो महद्भिः।
मन्दं कुर्वन् सपदि रजनीचारिणं नीलयोगात्
मह्यं भद्रं दिशतु सततं मङ्गलानां निदानम्॥ 5.34॥ 145

मन्दो हासस्तव रघुपते ! कोऽपि शुक्लः पटोऽयं
शोणोपान्तैर्जयति मधुरः सेवितोऽयं प्रसूते।
श्लाघ्यं दिक्षु प्रसृतमभितः शोभनं भासमानं
चित्रं वस्त्रं यश इति महत् सम्पदं तच्च सूते॥ 5.35॥ 146

“सुमित्रापुत्रः किं सुहृददतितरां भ्रातरि रतः
विधत्ते शुश्रूषां मम च यतते मार्गणविधौ?”।
इति स्वामिन् ! पृष्टः पवनतनयोऽभूदिति गिरा
प्रियायास्ते मन्दस्मितमवतु जातं रघुपते !॥ 5.36॥ 147

स्पन्दो यस्य प्रदिशति मुदं मैथिलीमानसान्ते
सम्मोहं तं सरसमधुरो मेदुरो भाववर्गैः।
कुन्दोदन्तं परिभवपदं यो विधत्ते नितान्तं
मन्दो हासो जयति सुतरां मैथिलीवल्लभस्य॥ 5.37॥ 148

“साकेतात् किं मम स भरतो देवरस्सत्त्वमूर्तिः
सेनां पीनां गजहयमुखैः प्रेषयिष्यत्यनन्ताम्?”।
एवं पृष्टः पवनतनयोऽभून्मयेत्यत्र वाचा
प्रेयस्यास्ते समुदितमिदं पातु मन्दस्मितं माम्॥ 5.38॥ 149

नन्दिग्रामे रतिमुपगतः भ्रातृशत्रुघ्नहृद्यः
शुद्धश्शुद्धं द्विजकुलमलं पालयन्नन्तरङ्गम्।
कैकेय्यन्तस्स्मृतिमुपगतो हानुतापं वितन्वन्
मन्दो हासो जयति भरतो मैथिलीवल्लभस्य॥ 5.39॥ 150

“मया दत्तं चूडामणिमयमभिज्ञानमकरोत्
स्ववस्त्रान्ते बद्धं परमथ च कर्णे विनिहितम्”।
इति श्रीसीतायाः सरसमतिचित्रं च वचनं
स्वकर्णे ते कर्तुः जयति मधुरं मन्दहसितम्॥ 5.40॥ 151



sundarasimham-ramanuja-dasan sunder kidambi prapatti.com

“नेत्रे चूडामणिमपि तथा कर्णयोः काकवार्तां
मौलौ कृत्वाञ्जलिमपि नतः प्रस्थितः पावमानिः।
भङ्क्त्वा वृक्षान् वनमपि तथा चैत्यसौधं जगर्जे” -
त्येवं सीतावचनजनितो राजते रामहासः॥ **5.41** ॥ 152

चन्द्रस्ते वदनं धृतं हि यदिदं श्रीनीलकण्ठेन यत्
ताम्रं तत् सततं विभात्यधरतस्तस्योदयस्सर्वदा।
तस्मिन् काचन चन्द्रिका विजयते मन्दस्मिताख्या सती
या मे संसृतितामसीमपि परां शुद्धां विधत्ते नवाम्॥ **5.42** ॥ 153

“स्वामिन्! वातशिशोः कथं हि भगवन्! श्रीर्दक्षिणस्योदिता
त्वन्मन्दस्मितचन्द्रिका च सुभगा तत्रोदिता शोभते।
अस्मिन् श्रीवडुवूर्वने सुभवने क्रीडापरायास्त्वया
कोऽप्यानन्दपयोनिधिर्मनसि मे संवर्धते साम्प्रतम्” ॥ **5.43** ॥ 154

“सीते! ते कपिना हता हि बहवो रात्रिञ्चरा दुर्जयाः
हन्ताक्षोऽपि हतस्तदेष तपसा सत्यं त्वया निर्मितः।
इत्यागत्य ममान्तिके समवदन् रक्षस्त्रियस्तास्समाः”
इत्याकर्ण्य विदेहजागिरमभूद् मन्दस्मितं राम! ते॥ **5.44** ॥ 155

“नीतस्त्विन्द्रजिता दशास्यसमितिं बद्ध्वा तदीयेऽनलः
वाले हा! निहितश्च राक्षसगणैस्तेनापि रक्षोगृहे।
चित्रं जानकि! जानकीति वचसा काव्यन्ति रक्षस्त्रियः”
इत्थं दारगिरा मुखे तव बभौ मन्दस्मितं राघव!॥ **5.45** ॥ 156

“सीतां पातुं निशिचरपुरे तद्विरुद्धांश्च दग्धुं
कल्याणो वो मम पितृसखः क्लृप्तसिद्धिः किलासीत्”।
इत्यन्तश्श्रीपवनतनयश्रीगिरा मन्दहासः
श्रीमन्! जातो मनुकुलमणे! मानसं मे धिनोति॥ **5.46** ॥ 157

दग्धा सा मिथिला पुरा खलु तदा दग्धं न मे किञ्चने -
त्याह श्रीजनकस्तथैव भगवान् श्रीयाज्ञवल्क्योऽवदत्।
एवं त्वय्यपि सादरेषु भवितेत्येवं हनूमद्गिरा
जातं ते रघुनाथ ! मन्दहसितं मञ्जुप्रभं भासते॥ **5.47** ॥ 158

"प्रासादानां भुवि निपतताम् अग्निना घोरलीले -
नारामान्ते झटिति पततां वृक्षशाखागणानाम्।
आरात् खस्थद्विजकुलगता याऽविरासीदवस्था
सा मेऽद्यापि स्मृतिमुपगता चेतसस्सौति कम्पम्" ॥ **5.48** ॥ 159

"सर्वत्रैवं सकलभयदे सम्भ्रमे जागरूके
चित्रं मत्कं पदमपि मनागग्निना नाभिभूतम्"।
इत्थं देव्या भयपिशुनया चित्रवत्या गिरा ते
जातं मन्दस्मितमवतु मां आनने रामभद्र ! ॥ **5.49** ॥ 160

"सोऽयं मारुतनन्दनो दशमुखे सिंहासनस्थे पुरः
वालेनैव कृतासनस्तदुपरि प्राप्तस्थितिस्सम्बभौ"।
इत्येवं सरमा सखी समवदत् से"ति स्वजायागिरा
यन्मन्दस्मितमानने रघुपते तत्ते तरां द्योतते॥ **5.50** ॥ 161

"राज्ञो नः पुरतः किमेवमिति तैः सन्तर्जितो वालधिं
विस्तीर्याथ दशाननासनमसौ तं चाचकर्षाद्भुतम्"।
इत्येवं सरमा हसन्त्यतितरामाहे"ति सीतागिरा
सञ्जातं तव राम ! मन्दहसितं रक्षत्ववज्ञाविषात्॥ **5.51** ॥ 162

"मा मैवं रजनीचराधिपमिमं कुर्याः स्थितास्ते वयं
वाचैवं किल मन्त्रिणाम् अथ च तान् आकृष्टवान् वालतः।
इत्येवं सरमाऽद्भुतैकविवशा प्राहे"ति सीतागिरा
यन्मन्दस्मितमानने तव बभौ रामास्तु तन्मे श्रियै॥ **5.52** ॥ 163

“तान् सर्वानपि राक्षसान् अपि सभास्तम्भान् समांश्चेतरान्
पौलस्त्यं च बबन्ध हन्त ! निबिडं वालेन वातात्मजः।
इत्येवं सरमा ममाह विवशा सास्रा सहासा सखी
से”ति श्रीदयितागिरा विजयते मन्दस्मितं ते मुखे ॥ **5.53** ॥ 164

“एतत्तत्र पुनश्च किञ्चन महाश्चर्यं यदासीत्तदा
वाले वेष्टितुमम्बराणि निखिलान्यासन् न चालं पुनः।
आनीयाथ बबन्धुरर्धमथ नैवासीद्दशाप्येकिका
वागेवं सरमाभवे”ति दयितावाचा करोषि स्मितम् ॥ **5.54** ॥ 165

“श्वः किं कुर्युरमी दिगम्बरदशैवासीदहो ! रक्षसां
लज्जाम्लाननिजानना न बहिरत्रैते चरेयुर्दिवा।
तस्मादेव निशाचरा” इति सखीवाचाऽथ वाचा च ते
जानक्या वदने यदास हसितं मन्दं तदेतत् स्फुटम् ॥ **5.55** ॥ 166

“एतच्चापि न यत्र नाम न निशा संराजतेऽस्मिन् पुरे
वालाग्रेर्ज्वलनेन हन्त ! सततं दृश्यं दिवैवाभवत्”।
इत्येवं सरमागिरा मम मतिर्मग्ना मुदां सागरे”
सीताया इति ते मुखे किल गिरा मन्दस्मितं वर्धते ॥ **5.56** ॥ 167

“सीता त्वं पृथिवीभवा गगनवत् सूक्ष्मं च मध्यं परं
देहेनैव समेन गन्धवहतां धत्से रसानां निधिः।
एवं वालहुताशनेन विनता साऽसीति मत्का सखी
प्रोवाचे”ति विदेहजाघनगिरा मन्दस्मितं पातु माम् ॥ **5.57** ॥ 168

“हास्यं सीते ! शृणु परमिदं राक्षसा बालकान् स्वान्
चेष्टासक्तान् निजवशगतान् कर्तुमेतं वदन्ति”।
अब्रूतैवं मम किल सखी सेति सीतागिरा ते
वक्त्रे मन्दस्मितमिदमभूद् राम ! रामाभिरामम् ॥ **5.58** ॥ 169

“वालानलो वा पतिभक्तियुक्त -
बालानलो वा दहति स्म लङ्काम्।
कालानलोऽयं हि पलाशनाथ !
कोलाहलो वेति निशाचराणाम्” ॥ 5.59 ॥ 170

“वर्णावलिर्वाचि समुद्गतेयं
कर्णावलिं प्रैति दशाननस्य।
संवर्णयन्तीति सखी”ति सीता -
सौवर्णतः किं हससीति मन्दम् ॥ 5.60 ॥ 171

“सदागतितनूभवः मम मुदागतेरुत्तमं
निदानमभवत्तदा तव पदाब्जसक्ताशयः।
विदारितनिशाचरो नयविदामसावग्रणीः
ददाह नगरीं च ताम् इह सदा सदाशंसितः” ॥ 5.61 ॥ 172

इति प्रियायाः प्रतिभान्विताया
अतिप्रियाभिः श्रुतिमञ्जुलाभिः।
रतिं प्रपन्नस्य सति स्ववक्त्रे
स्मितं तदेतत् प्रतिभाति गीर्भिः ॥ 5.62 ॥ 173

अपाङ्गतस्सादरमाञ्जनेयं
सम्पश्यतो वल्गुवचः प्रियायाः।
तत् शृण्वतः सोदरसन्नुतस्य
मन्दस्मितं भाति रघूत्तमस्य ॥ 5.63 ॥ 174

॥ इति सुन्दरस्पन्दः समाप्तः ॥

prapatti dot com
sunder kidambi

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ युद्धस्पन्दः ॥

कविताजितकल्लोलिकन्यकाकान्तवक्षसे।
करुणादिगुणाढ्याय कमलानिधये नमः ॥

“दृष्ट्वा तोयनिधिं भयानकमहावीचीचयैस्तादृशं
गम्भीरं विपुलं घटीसुतमुनेराह्वानमस्याथ च।
पानं तेन समुद्रशोषणमथो पद्‌भ्यां च यात्रा स्थले”
चेत्थं त्वद्भटवाक्यतो यदभवत् तद्वा किमेतत् स्मितम् ? ॥ 6.1 ॥ 175

“निद्रायातं कुमारौ सुखमिह निशि वां रक्षणे जागरामे -”
त्येवं श्रीशूरवादान् प्रहरणसहितान् वानरान् मध्यरात्रे।
निद्राक्रान्तानवंस्त्वं धृतकवचधनुर्लक्ष्मणेनानुयातः
वेलायां चारिवप्रस्स्मितमिदमतनोर्ध्येयमेतत्सदा नः ॥ 6.2 ॥ 176

आयाते दशकन्धरस्य सहजे रक्षाप्रतीक्षे स्थिते
“त्यक्त्वा भ्रातरमागतो विपदि यस्तस्मिन् कथं विश्वसेः ?”।
इत्येवं त्रिदशोदितत्वगुणतः प्रत्यूहवाक्यं रवेः
सूनोर्हन्त ! निशम्य ते यदभवत् तद्वा किमेतत् स्मितम् ? ॥ 6.3 ॥ 177

साधू रावणसोदरो रघुपते ! तस्मात् स पाल्यो हि नः
चेत्थं वादिनि मारुतस्य खमणेर्विद्याजनिम्यां सुते।
ईदृग्दुष्टनिदानतो नयपथे साध्यं कथं साधयेत्
निर्दुष्टं कपिरित्यभूत्तव तदा वक्त्रे किमेतत् स्मितम् ? ॥ 6.4 ॥ 178

त्याज्यः पक्ष्यो हि शत्रोर्दशमुखसहजः सोऽयमित्युक्तियुक्तः
सुग्रीवः सूरसूनुः सकलमपि गृहे राक्षसानां समूहम्।

कुर्वन्नस्तीति वायोः सुतवदनभवां भारतीं श्लेषसौम्यां
श्रुत्वा यत्ते मुखाब्जे स्मितमभवदहो ! मन्दमेतत्तदेव ॥ **6.5** ॥ 179

अब्धिं तर्तुमुपायमेकमुचितं ब्रूया ममेति त्वया
पृष्टो राक्षसराजतामधिगतो दत्ताभयोऽयं प्रभो !।
गच्छेस्त्वं शरणं समुद्रमिति यत्त्वामाह वाक्यं तदा
मुग्धत्वं च विचिन्त्य तस्य यदभूत् तद्वा किमेतत् स्मितम् ? ॥ **6.6** ॥ 180

गङ्गामङ्गलसूत्रमेव भवतश्चक्षुष्पथे न्यस्य तद्
वार्धिस्त्वां शरणं जगाम भगवन् ! कोऽत्र प्रपन्नोऽन्ततः ?।
दण्डोऽस्मा इति कल्पितोऽस्य रिपुषु प्राप्तास्पदोऽभूत्तदा
लीलां चिन्तयतस्तवेति भगवन् ! वक्त्रे किमेतत् स्मितम् ? ॥ **6.7** ॥ 181

त्यक्त्वाहारमभूत्तु दर्भशयने घस्रत्रयं राघवः
क्लृप्तस्सेतुरसौ न यावति भवेत् तावन्न भुङ्क्ते प्रभुः।
तस्माच्च त्वरयास्तु सेतुरचनेत्येवं मृदां धूननं
कायात् काष्ठबिडालकस्य भगवन् दृष्ट्वा किमेतत् स्मितम् ? ॥ **6.8** ॥ 182

सर्पास्त्रश्लथनं, हिरण्मयवपुः, तादृक्षनासा तथा
भूषाः पन्नगकल्पिताः श्रुतिमयो नादश्च पक्षोत्थितः।
स्वीयाब्जाङ्गिकिणाङ्कितं करयुगं दृष्ट्वापि सर्वं तदा
पृच्छन् कस्त्वमिति द्विजेश्वरमधाः यत्तत् किमेतत् स्मितम् ? ॥ **6.9** ॥ 183

हस्तान् विंशतिमुद्धरन् भयमपि प्राणे दधत् सर्वतः
खर्वाटो दशमस्तकेष्वपि तथा हित्वा च शस्त्राण्यपि।
पौलस्त्यस्स पदा चचार च विभो ! दृष्ट्वा तदीयां दशां
तृप्तं देवगणं समीक्ष्य भवता क्लृप्तं किमेतत् स्मितम् ? ॥ **6.10** ॥ 184

पौलस्त्यं ननु मध्यमं कपिगणो दृष्ट्वा द्रुतस्तादृशं
यन्त्रं तन्नहि राक्षसस्त्विति वदत्भ्रातुर्धृतिं तादृशीम्।
पूर्वं तां किल काननेऽस्य च दशां सङ्गे कबन्धस्य च
स्मृत्वा किं रघुपुङ्गवोदितमभूदेतत् स्मितं नः प्रभो ! ॥ **6.11** ॥ 185

विन्ध्योऽयं किमु सञ्चरन्निति तदा चिन्तान्वितो भास्करः
श्रीमन् ! नैजसुतं च मस्तकशयं तं कुम्भकर्णस्य तु।
तत्पाणावथ कर्णयोर्युगलमप्यालोक्य कर्णध्वनिं
चक्रे द्वापरमेयिवान् किमकरोः श्रुत्वा तमेतत् स्मितम् ॥ **6.12** ॥ 186

“सुग्रीवस्तनयं पितुः समुचितं तं कुम्भकर्णं तदा
तेने विश्रवसं स्वसुः समुचितं नासाविहीनं तथा”।
इत्येवं पवनात्मजे कथयति श्रीरामभद्र ! प्रभो !
सौमित्रिं तव पश्यतः समुदितं मन्दस्मितं पातु माम् ॥ **6.13** ॥ 187

“राजा कुप्यति” “किं निदानमधुना कोपस्य तस्येशितुः ?”
“मद्वाक्यं किमिति त्वया तव भटैः सर्वं तथानुष्ठितम्।
रक्षोवीरशरीरमज्जनमिदं वार्धौ”रिपोः किङ्करा -
लापान् वानरवर्णितानिति विभो ! श्रुत्वा किमेतत् स्मितम् ? ॥ **6.14** ॥ 188

“मायेवास्ति विदेहराजतनया देवस्य सा निर्मिता
वक्ष्यन्तीति मुनीश्वरा मयसुतासूनोश्च मायाकृता।
सीतेयं निहताऽद्य देवविजयस्तत् सूच्यते मा शुचः
त्वं देवे”ति विभीषणस्य वचनं स्मृत्वा किमेतत् स्मितम् ? ॥ **6.15** ॥ 189

इन्द्रास्त्रेण हतो बभूव समरे चेन्द्रस्य जेताऽऽशरः
त्विन्द्रोऽयं किल राघवो ननु मते रामानुजस्येति तत्।
साक्षादित्यथ जैमिनीयवचनं वृत्तान्ततस्सूचय -
द्वाल्मीकेः किल पाटवेन भगवन् ! वक्त्रे तवेदं स्मितम् ॥ **6.16** ॥ 190

दृष्टेत्याह वचः तदेव वदनं देवश्रियोऽन्वेषणे
कुम्भीसूनुपथोत्थरस्यमधुपासक्तेः फलं तादृशम्।
नष्टेत्याह वचस्तदेव वदनं मायाश्रयोक्तिश्रुतेः
एवं चेश्वरवैभवे हि विबुधा इत्यस्ति किं वा स्मितम्?॥ **6.17** ॥ 191

“ऊर्गेषा मयि वा षडर्धनयने चेत्युक्तितोऽयं जनः
साम्यं वां मनुतां ततः किमिति तद्वाक्यं च रामायणे”।
“मैवं मूढसुयोधनोऽपि पठिता ह्यात्मानमेनं शरं”
कैलासस्थितदम्पतीवच इदं स्मृत्वा किमेतत् स्मितम्?॥ **6.18** ॥ 192

सीतान्वेषणशोकदावदहने देवा न चक्रुर्दयां
पक्षीन्द्रस्तु जटायुरेव जनको ज्ञानी समं मे तदा।
एतर्ह्येष रथं ददाति मघवा दृष्ट्वा जयं मे स्वयं
जेतारं भजते हि लोक इति वा स्मृत्वा किमेतत् स्मितं?॥ **6.19** ॥ 193

“युद्धे विंशतिवीक्षणैस्तव मुखं संवीक्ष्य रक्षःपतिः
धिङ् मां श्रीजनकात्मजामुखमितोऽयुक्तं वियुक्तं व्यधाम्।
तन्मत्कान्यपि विक्रमेण हरतु स्वाङ्गौ विधत्तां च मां
इत्यन्त्यस्मृतिराप्य चैद्यनृपताम् आपात्मनो वाञ्छितम्॥ **6.20** ॥ 194

मन्दाकिनीमस्तकलालितस्य
मन्दोदरीनायकमस्तभेत्तुः।
मन्दस्मितं मानववंशनेतु -
र्मन्देतरं मङ्गलमातनोतु॥ **6.21** ॥ 195

पुत्रो विश्रवसोऽपि मद्विरहितां त्वामेव देव्यैहत
पुत्री विश्रवसोऽपि हन्त रहितं मां सा त्वया जानकि !।
आर्षं राक्षसयोनिसङ्गतमिदं नष्टं कुलं पश्यतोः
आलम्बोऽत्र विभीषण”स्त्विति मुदा मन्दं स्मितं जृम्भते॥ **6.22** ॥ 196


sunder kidambi prapatti.com

सज्जा किं किमयं विलम्ब इति वा पृच्छा न काचित् कृता
सा क्लान्तिः विरहोत्थशोकवचनं तच्चास्तमेतं कथम्?।
इत्थं मारुतनन्दने बहुविधां चिन्तां दधाने तदा
मायाविन्! रघुनाथ! वक्त्रकमले यत्ते स्मितं किंन्विदम्?॥ 6.23॥ 197

श्रुत्वा मत्परुषं चितां कुरु ममेत्याह स्वयं जानकी
सौमित्रे! ह्यकरोस्तथैव सहसा नावारयत् कोऽपि माम्।
भीत्या किं जडतेति पुष्पककथाकाले कपिः कश्चिदाः!
लङ्कादाहकथेति मन्दमवदत् तस्मै किमेतत् स्मितम्?॥ 6.24॥ 198

विष्णो! लोकमुपेहि रावणशठो निर्मूलमुन्मूलितः
चेत्थं देवगणे स्वकार्यमुदिते नाट्यं परं तन्वति।
तातोऽयं तव राघवेति भवतो दत्त्वोपदां पार्श्वगे
शम्भौ नाम्नि रते प्रसादपिशुनं मन्दस्मितं शोभते॥ 6.25॥ 199

“भार्याप्रीतिपरो यथाहमभजं कष्टं तथा त्वं सुतः
भूमौ मे समता गुणैरिति जनाः सर्वे वदन्ति स्वयम्।
कृत्वाहं समतां भजेय तव हे! वह्नौ प्रविष्टां शठां
कैकेयी”मितिवादिनं दशरथं दृष्ट्वा किमेतत् स्मितम्?॥ 6.26॥ 200

“सर्वे किं कपयो लसन्ति? गणना संयक् कृता किं त्वया?”
“देवैकं तु विना समे, यमपुरे स्वर्गेऽपि नास्त्येव सः।
किष्किन्धानगरे च” “कुत्र स गतो?” “दृष्टोऽद्य यन्त्रोदरे
क्षिप्तेऽब्धा”विति सम्भ्रमेण भवतो मन्दस्मितं किं मुखे?॥ 6.27॥ 201

किष्किन्धारमणीर्विधाय रमणी सीता विमाने तदा
मोदं प्राप तथैव तत्र महिताः ताश्चापि सर्वाः स्त्रियः।
पुच्छं नास्ति कथं नु सुन्दरवपुः सीतेति वाचं विना
यत् प्रोचुर्भगवन्! तदेतदिह ते बीजं स्मितस्य प्रभो!॥ 6.28॥ 202

“गन्तव्यं त्वरया रुमे !” “यदि न किं” “वह्नौ पतिष्यत्यहो
भ्राता श्रीभरतः” “पतत्त्विह यथा सा त्वं तथा जीवतु”।
“नैवं तत्र पतिष्यति प्रभुरसौ” इत्येव सीतारुमा -
संलापेन मितं स्मितं रघुपते ! जातं दरीदृश्यते ॥ **6.29** ॥ 203

भारद्वाजगृहे समर्पितमहाभोग्यान्नजग्धौ तदा
कन्दं खादति भास्करस्य तनये हस्ताच्युतं तत् प्लुतम्।
तद्दृष्ट्वा स कपीश्वरोऽपि भगवन् ! तं चानु सर्वेऽथ ते
तद्दृष्ट्वा वदनारविन्दघटितं मन्दस्मितं किंन्विदम् ॥ **6.30** ॥ 204

“सीतायै भवते नमो नम इदं भ्रात्रे च राम ! प्रभो !
या तेने मम वालवह्निमनघा शीतं सुधांशोरपि।
यो राज्यं व्यवधूय ते पदरतः श्रीपादुकेवाबभौ”
इत्याकर्ण्य हनूमतो गिरमहो ! मन्दं विधत्से स्मितम् ॥ **6.31** ॥ 205

“भरत ! भवतो भक्त्या नित्यं व्रतैः परिपूजनैः
भवति सुमना देवो विष्णुः स नः कुलदैवतम्।
विपदि पतितान् लङ्कायुद्धे ररक्षतरां समान्”
इति जनकजावाचा रामाभवन्नु मितं स्मितम् ॥ **6.32** ॥ 206

“कौसल्या मयि सादरा मम शिरस्सन्मण्डनं निर्ममे”
“पुच्छं कुत्र गतं” “तदत्र भविता नैवाद्य नारीतनौ”।
“पुच्छं मस्तगतं तवे”ति वचसा भर्तुर्ह्रियाऽवाङ्मुखीं
दृष्ट्वा राम ! रघूत्तमास वदने यत्ते स्मितं तन्निवदम् ॥ **6.33** ॥ 207

“कुब्जे ! त्वं भवने भवात्र कलहो माभूत् पुनस्तेऽधुना”
“मैवं राघववैभवं मम दृशोः प्रीत्यै कथं नो भवेत् ?।
आस्ये मे विषमस्ति तत्र निबिडं कन्थाकृतं कन्दुकं
न्यस्यामी”ति वचो निशम्य भगवन् ! धत्से स्मितं किंन्विदम् ? ॥ **6.34** ॥ 208

नैयग्रोधघटेन जन्यकलितः पट्टाभिषेको भवेत्
एहि श्रीगुह ! हेति लक्ष्मणवचः श्रुत्वा गुहे प्रेमतः।
आरादेत्य पुरैव राम ! पयसा तस्याभिषेकोऽभवत्
क्लृप्तस्ते कलिता जटेति वदति प्रीत्या किमेतत् स्मितम् ? ॥ **6.35** ॥ 209

पुच्छं शेषसमानमस्य च तनुर्द्यां व्याप्य भीमा स्थिता
सोऽयं मर्कट एव खे गिरिरदोहस्ते महानैक्ष्यत।
वव्राजाथ च दक्षिणां दिशमसौ नम्रोऽतिरम्योऽधुना
साकेतीयवचस्त्विदं किल विभो ! सूते स्म मन्दस्मितम् ॥ **6.36** ॥ 210

अग्रे पादुकया दयाभ्यधिकया पार्श्वेऽपि भूमीभुवा
वायोरात्मभुवा पदाम्बुजयुगीं सङ्गृह्णता सादरम्।
छत्रं चामरयोर्युगं च वहता भ्रातृत्रयेणावृतः
सर्वत्राऽपि सुहृद्गणैस्त्वमतनोः किन्त्वेवमेव स्मितम् ? ॥ **6.37** ॥ 211

॥ इति युद्धस्पन्दः समाप्तः ॥

श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ प्रकीर्णस्पन्दः ॥

कविताजितकल्लोलिकन्यकाकान्तवक्षसे।
करुणादिगुणाढ्याय कमलानिधये नमः॥

वडुवूरितिवर्ण्यवैभवो
  वसुधायां वरदेश एधते।
वसुधासुतया रघूत्तमो
  वरदो यत्र विराजते विभुः॥ 7.1 ॥ 212

विभवे भवने वनेऽपि यो
  विदधे विश्वविलोचनोत्सवम्।
विदधाति तथैव साम्प्रतं
  विशतां श्रीवडुवूर्निवेशनम्॥ 7.2 ॥ 213

निशि सञ्चरतीति चन्द्रमाः
  विजितोऽनेन मुखेन युज्यते।
निशिसञ्चरतामरातिना
  विभुना नाम विदेहजाभुजा॥ 7.3 ॥ 214

कमलावत्सकुलोदिताननं
  कमलं ते जयतीति नोचितम्।
कमलावत्सकुलोदितानने
  कमलानाम् अथ शिष्यतोचिता॥ 7.4 ॥ 215

निजफालतलेन राघवः
  निजतिथ्यग्रतिथौ समुत्थितम्।

द्विजराजमयं जयन् पुन -
द्विजराजेन धृतो महे महे ॥ 7.5 ॥ 216

स्मितचन्द्रिकया समुज्ज्वलं
वदनं राघव ते नु चन्द्रमाः।
अथवा विकसत्स्मितेन ते
वदनं तत् कमलं नवं नवम् ॥ 7.6 ॥ 217

अधरं तव चारु शोभते
सुधया किं नु विनिर्मितं विभो !।
नयनं मम यत् पिबद् मुदा
विगतं भाति निमेषतः परम् ॥ 7.7 ॥ 218

अधरामृतपायिनाऽमुना
तव नासाबिलनिर्गतेन किम्।
मणिना क्रियतेऽत्र नर्तनं
चलितेनाथ तव स्मितेन वा ॥ 7.8 ॥ 219

एकत्र गण्डे तनयां धरण्याः
एकत्र गण्डेऽनुजलक्ष्मणं च।
वहन् खरारिः प्रतिबिम्बभूतौ
स्वपद्यभावं स्वयमेव वक्ति ॥ 7.9 ॥ 220

जह्यामहं जीवितमप्यथ त्वां
सलक्ष्मणामित्युदिते मुखान्तः।
लग्नावभूतां तदुभावितीमम्
अध्यक्षतो दर्शयसीति मन्ये ॥ 7.10 ॥ 221

मुह्यन्ति खानि निखिलानि मुखं त्वदीयं
सम्पश्यतो ननु जनस्य ततो मुखं तत्।
अन्यत्र तत् पुनरभूदुपचारतस्तत्
पत्युर्न नीतिरितिवत् च विमर्शनीयम्॥ 7.11॥ 222

मुहुः खमालोक्य विलोक्य चन्द्रं
लङ्कावने राघवधर्मपत्नी।
"मुखं हि रामस्य स एष मेघः
स एव मे येन दशा ममेयम्"॥ 7.12॥ 223

अपङ्कमेतद्वदनं त्वदीयम्
अथ त्वमी पङ्कजमामनन्ति।
सपङ्कतामात्मनि ते वहन्तः
सकम्पनाः किन्तु भवन्ति भूयः॥ 7.13॥ 224

पद्मं मुखं ये तु वदन्ति भूयः
पराङ्मुखा एव बतार्धमार्गे।
पदो हि मां तद्वहतीति पद्मं
मुखेन को वा सदृशं विदध्यात्॥ 7.14॥ 225

सौन्दर्यसारसदनं वदनं त्वदीयं
मन्दस्मितेन मधुरं मनुवंशनाथ !।
नन्दन्नतौघनयनं नलिनं विधूय
विन्दज्जयं विजयदं जयतीह मह्यम्॥ 7.15॥ 226

ईषदपि नेति शब्दः
नैव मुखेऽस्मिन् कदाऽपि सम्भवति।
तस्मादाननसंज्ञा
सास्मिन् सार्था मुखे जयति॥ 7.16॥ 227

कृष्णाम्बुदह्रीकरकान्तियुक्तः
  तृष्णावहश्श्रीजनकात्मजायाः।
उष्णांशुवंशोदितशीतरश्मेः
  पुष्णातु भूतिं मुखशीतरश्मिः॥ 7.17 ॥ 228

काननं विश सुतेति वार्तया
  काञ्चनं किल यदाननं बभौ।
काननोदितवचोऽनुसारिणः
  स्वाननं मम तदस्तु भूतये॥ 7.18 ॥ 229

नासा त्वदीया रघुनाथ ! सत्यं
  श्वासाकृतिश्रीश्रुतिपेटिकेयम्।
श्रुतिं तवेमां च ततः स्पृशन्ती
  दृष्टिस्सुदीर्घा पृथुला विभाति॥ 7.19 ॥ 230

नासा त्वदीया नयनाभिधेन
  नीलाब्जयुग्मेन कृता स्वमध्ये।
श्रीचम्पकाभिख्यसुमाभिरामा
  सम्पश्यतां सौति सुखं दृशोर्नः॥ 7.20 ॥ 231

आनन्ददं नयनयोर्नमतां जनानां
  आभां बिभर्ति नलिनस्य नवस्य नित्यम्।
आलम्बनं नवनवाद्भुतकान्तिभूम्नः
  आख्यातमाननमिदं तव तेन राम !॥ 7.21 ॥ 232

आश्चर्यकाष्ठां नयनं नयन्नः
  सौन्दर्यमाधुर्यमनोज्ञताभिः।
आभाति सीतासख ! यत्तवेदं
  तेनाननं नाम बिभर्ति नाम॥ 7.22 ॥ 233



sundarkidambi dot com sunder kidambi

चम्पकातिरमणीयनासिका -
कम्पमानमणिकान्तिराजितम्।
बिम्बरम्यमधुराधराश्रयं
चुम्बतीव वदनं मतिर्मम॥ 7.23॥ 234

सामिसोमरमणीयफालकं
स्वच्छदर्पणकपोलललितम्।
आननं मम विभातु मानसे
रम्यराम! वड्डुवूर्निवास ते॥ 7.24॥ 235

अञ्जनासुतविलोचनादृतं
रञ्जनं जनकनन्दिनीहृदः।
भञ्जनं भजदघस्य मञ्जुलं
स्वं जनं वदनमातनोतु माम्॥ 7.25॥ 236

भ्रूविशेषधनुषा समन्वितं
बाणघोणमतिरम्यमाननम्।
तावकं नु भगवन्! त्वमेव वा
मामके मनसि वर्ततां सदा॥ 7.26॥ 237

चम्पकेन कुसुमेन सम्मिता
तावकी रघुकुलेन्द्र! नासिका।
विद्रुमाधरशुभासनस्थिता
कापि मङ्गलमयीव देवता॥ 7.27॥ 238

मारुतात्मजनिषेविता बहिः
मारुतेन पुनरन्तराश्रिता।
नासिका तव मनोहरा विभो!
सन्ततिं दिशतु सम्पदां मम॥ 7.28॥ 239



sunder kidāmbi prapatti dot com sunder kidāmbi

विद्रुमाधरविशेषभूषणं
सुद्रुमं सुरभुवस्तवाननम्।
सर्वपुण्यजनकाल ! राम ! मे
सर्वपुण्यफलदं समाश्रये॥ 7.29॥ 240

काननेन भगवन्निहार्थितः
काननेषु निवसन् मुनीश्वरान्।
स्वाननेन वचनेन सार्थयन्
स्वाननंहस इमान् कुरुष्व नः॥ 7.30॥ 241

लावण्यसिन्धौ वदने त्वदीये
लक्ष्मीरियं काचन नासिकेति।
लीलावती सस्मितसूनकान्तौ
लाक्षानुलिप्ताऽधरजेन धाम्ना॥ 7.31॥ 242

पद्मे त्वदीये वदने निषण्णा
पद्मेव नासा परमाभिरामा।
पद्माप्तवंशोदितरामभद्र !
पद्मस्रगाढ्या तव लोचनेन॥ 7.32॥ 243

ललाटचन्द्रादुदिता तवेयं
श्रीनर्मदा काचन नासिकेति।
सङ्गाहते किन्त्विति वारिराशिं
यत्राधरं विद्रुममस्ति रम्यम्॥ 7.33॥ 244

लक्ष्मीरियं काचन सौम्यमूर्तिः
सत्यं त्वदीया ननु नासिकेति।
स्मितेन चन्द्रेण सहोदरीति
संलक्षिता भाति सहाधरेण॥ 7.34॥ 245

लक्ष्मीरियं काचन नासिकेयं
तवाननाम्भोजवरे निषण्णा।
यां भारती साधरसन्निवेशा
मन्दस्मिता पूजयति स्नुषेह ॥ 7.35 ॥ 246

ललाटचन्द्राद् गलिता सुधेव
नासाभिधा काचन धोरणीयम्।
यदग्रमुक्तामणिरेव सोऽयं
तद्बिन्दुरेतत् प्रकटीकरोति ॥ 7.36 ॥ 247

नासा परा काचन देवतेयं
सीतापते ! ते नहि संशयो नः।
भासा विशुद्धो ननु नाम हासः
संसेवते यां तु सहाधरेण ॥ 7.37 ॥ 248

ना नाम हासो यदयं पुमांस्तत्
सा नाम नासा यदियं हि नारी।
नासा च हासो ननु दम्पती तौ
हासोऽथ नासां शिरसा बिभर्ति ॥ 7.38 ॥ 249

माधुर्यचातुर्यमुखैरुपेतं
मन्दस्मितं ते मम राम ! हृद्यम्।
मन्दः परं सोऽहममीभिरीष -
दलङ्कृतं मां दयया विधेयाः ॥ 7.39 ॥ 250

जानाति जात्वपि मनागपि नानृतं यत्
वक्तुं प्रभो ! तव मुखं तत एव सत्यम्।
शुद्धेन हन्त मधुरेण मृदुस्मितेन
पूताधरेण जनतां नितरां धिनोति ॥ 7.40 ॥ 251

आननं तव विलोक्य सुन्दरं
    काननं व्रज सुतेति सा कथम्।
भारती ह जननी सुलोचना
    भारतीमसृजदाः ! परीक्षितुम्॥ 7.41॥ 252

आननं तव कुरुष्व मानसे
    माननं प्रति न चिन्तयेतरत्?।
स्वाननेऽपि मम नामकीर्तनं
    गाननेतृहनुमन्मुखादृतम्॥ 7.42॥ 253

वानरेन्द्रहनुभूषणेन ते
    दानवेन मनुवंशभूषण !।
भानवेन च धृतं स्वमानसे
    आननं भवतु मानसे मम॥ 7.43॥ 254

मानवं कुलमभूषयत् भवान्
    मानसं च महतां तवाननम्।
मानवे मयि दयां विधाय भोः !
    मानसे मम निवासयाननम्॥ 7.44॥ 255

गानसेवनकुतूहलान्विते
    मानसे वसति ते किलाननम्।
त्यागराजविबुधो निदर्शनं
    नागराजतनुरत्र तेऽनुजः॥ 7.45॥ 256

काननेषु चरतस्तव प्रभो -
    राननं कविमुनिर्विलोक्य तत्।
काननेषु स सतीं सरस्वतीं
    स्वानने कलयति स्म वर्णयन्॥ 7.46॥ 257

sunder kidambi
prapatti dot com
sunder kidāmbi

मदनान्तकचापभेदिनो
वदनं ते वसुधासुतापते !।
सदनं रमणीयताश्रियो
मदनन्तातुलमङ्गलास्पदम्॥ 7.47॥ 258

वसुमतीसुतावल्लभस्य ते
वदनवारिजं वारिताशुभम्।
वरविलोचनं वातजेडितं
वसतु मानसे मामके सदा॥ 7.48॥ 259

पवनभूनुतं पावनं परं
पशुपतेर्मनःपञ्जरस्थितम्।
परशुधारिणः पथि मुनेर्गिरा
परम ! ते स्मितं भावये मुखम्॥ 7.49॥ 260

श्रीमन् ! ते मुखजं महो हि महितं शीतं सरः कोमलं
तस्मिन् ते मुखमेव तामरसतां रम्यां परां गाहते।
तस्मिन् क्रीडति निस्समाऽतिमधुरा सौन्दर्यलक्ष्मीर्नवा
सा मे सौतु सुखानि सन्ततमियं श्रीरामचन्द्र ! प्रभो॥ 7.50॥ 261

मन्दो न मत्तो भुवि मानवोऽस्ति
त्वत्तो हि नूनं न पुमान् हि धीमान्।
मन्दस्मितं केन तवाननेऽभूत्
मदर्थमेवेति वितर्कयामि॥ 7.51॥ 262

मनुष्यरक्षां भगवन् ! विधातुं
मनुष्यतामाप भवान् यथा वा।
स्मितं तथेदं मम रक्षणाय
मन्दस्य मन्दत्वमवाप नूनम्॥ 7.52॥ 263

सत्यं तदेतत् यदिदं स्वपार्श्वे
  यत्राधरं स्वेन सुधामयेन।
धाम्ना परिष्कृत्य सरागमिन्धे
  रक्षाधराणां हि शुचिस्वभावः॥ 7.53 ॥ 264

द्विजराजतिरस्कृतिं दधत्
  त्वधरस्यापि पुरस्कृतौ रतम्।
भवतो रघुनन्दनाननं
  तदिदं शंसति सज्जनः परम्॥ 7.54 ॥ 265

अहो ! विशुद्धां द्विजपङ्क्तिमन्तः
  सञ्छादयत्येष किलाधरो यत्।
त्वदाननं तत्प्रणयं विधत्ते
  सर्वस्सगन्धेषु तनोति मैत्रीम्॥ 7.55 ॥ 266

दोषो महानेष तथाऽपि राम !
  त्वदाननं कर्षति मानसं नः।
सौन्दर्यसारैकनिधौ हि दोषः
  नोन्मेषमृच्छत्यपि भासमानः॥ 7.56 ॥ 267

तवाननं सारसमेव सत्यं
  कन्या भुवः सा रसमत्र भुङ्क्ते।
सौन्दर्यभूसारसमेतमेतत्
  यत्संसृतिस्सा रसमत्र सौति॥ 7.57 ॥ 268

कन्दर्पदर्पं हरतस्तवेदं
  मन्दस्मितं वर्णयितुं प्रवृत्तः।
मन्दं प्रतीदं स्मितमित्यपीमं
  मन्दस्मितार्थं प्रकटीकरोमि॥ 7.58 ॥ 269

sundar kidambi prapatti dot com sunder kidambi

मन्दो हि लोके मदयं समस्तः
मन्दं तमेनं प्रति मत्स्मितं तत्।
मन्दं स्मितं जातमितीममर्थं
मन्दाय मह्यं वदसीति भाति॥ 7.59॥ 270

सुधाधरे तवाधरे धरासुताकृतादरे
वरानने स्थिरासनेऽयि राम ! ते रमेतराम्।
तवाननं सरोरुहं दलं किलाधरोऽत्र ते
मधु स्मितं मनोहरं ममान्तरस्तु सन्ततम्॥ 7.60॥ 271

अधः स्थितं तवानने ततोऽधरं प्रकीर्तितम्
न केवलं तदेव ते वचोविलाससम्पदि।
अकारकस्य धारणं करोति यत्ततोऽधरं
धरासुतापते ! तरां जयत्यतो मनोहरम्॥ 7.61॥ 272

अमृतं ध्रियते ततोऽधरं
तदहं तत्र रता यदीति नो।
धरया कृतलालनेऽधरे
निरता स्यामिति जानकीवचः॥ 7.62॥ 273

मुखं त्वदीयं शरदिन्दुरेव
सौन्दर्यसिन्धौ प्रतिबिम्बिताङ्गः।
शरप्ररोहोऽस्य समीपभूमौ
सन्दृश्यते किञ्चिदिवाप्तवृद्धिः॥ 7.63॥ 274

मुखं त्वदीयं शरदिन्दुरेव
कन्याऽत्र पार्श्वे जनकस्य पुत्री।
चापोऽपि पार्श्वेऽत्र परत्र भाति
स्वामिन्नितः किं नु विमर्शनीयम् !॥ 7.64॥ 275

मुह्यन्ति खानि सकलस्य यदीक्षणेन
मुग्धा खरस्य भगिनी यदलाभविद्धा।
मुन्युत्तमा हृदयखे यदुपासते ते
मुग्धं मुखं मम मुदं तदिदं तनोतु॥ 7.65॥ 276

राम ! राम ! तव रम्यमाननं
मानसे वसतु मामके सदा।
येन सा मतिरनेन संसृतेः
मार्गतो भवति निर्गता बहिः॥ 7.66॥ 277

समोन्नतसुनासिकं सरसमन्दहासोज्ज्वलं
सरागमधुराधरं सुभगगण्डसन्मण्डनम्।
सुधाकरपरार्धजित् विमलफालपालीकलम्
सदा वसतु मानसे वदनमस्य सीतापतेः॥ 7.67॥ 278

रामाननश्रीर्मम भातु चित्ते
या मानवानाममृतं तनोति।
रामाननश्रीर्मम मास्तु चित्ते
या मानवानामनृतं प्रसूते॥ 7.68॥ 279

रामाननश्रीर्मम भातु चित्ते
कामादिदोषानपसारयन्ती।
रामाननश्रीर्मम मास्तु चित्ते
कामादिदोषानभिवर्धयन्ती॥ 7.69॥ 280

यत्रानृतस्पर्शलवोऽपि न स्यात्
तत्रामृतं नृत्यति सर्वदैव।
अत्राननं भाति निदर्शनं नः
मित्रान्ववायात् उदितस्य विष्णोः॥ 7.70॥ 281

वदनं वसुधासुतामनो -
मदनं वर्धयदद्भुताकृति।
सदनं सकलश्रियामिदं
मदनन्ताघततेर्निवारणम्॥ 7.71॥ 282

इन्द्राग्नी भवतो मुखादभवताम् इत्याह मान्या श्रुतिः
सत्यं हाससुधा सुधाशनपतेः जातं निदानं जनेः।
रक्तो योऽधर एष तस्य शिखिनः रक्तां शिखां बिभ्रतः
वेदोक्तिं निपुणं परं विमृशताम् अर्थोऽतिरस्यो भवेत्॥ 7.72॥ 283

जातो ब्राह्मण एष ते वदनतः ब्रह्मब्रुवन् तत् कथं
हन्त ! ब्रह्म समाश्रितं स्मितमिदं कर्णाश्रितं तत् पुनः।
संरक्ताधररक्तमेतदुभयं ब्रूते यतस्तद् द्वयं
कृत्वा कारणमाविरास वदनात् इत्यस्ति तत् साम्प्रतम्॥ 7.73॥ 284

अधरकिसलयाढ्यं नासिकाकुड्मलं ते
सुभगमसृणगण्डस्थानशाखान्तदेशम्।
विपुलवितुलफालश्रीफलप्राप्तशोभं
भजति वदनमेतत् कल्पकानोकहत्वम्॥ 7.74॥ 285

पौत्रस्य बाणत्वमवाप्य स त्वं
पुरत्रयध्वंसकरः किलासीः।
पुत्रस्य बाणत्वमिदं मुखे ते
मनो जनानां स्ववशं विधत्ते॥ 7.75॥ 286

नासाग्रजाग्रन्मणिनाऽधरस्ते
मन्दस्मितं चापि मनागिवेदम्।
सञ्छादिते किन्त्वथ संस्कृते वा
दृष्टिं जनानां हरतस्समेषाम्॥ 7.76॥ 287

नासा तवेयं वदनस्य भूषा
श्वासावली वेदवतीह जाता।
श्वासावलिं लोपयति स्म सत्यं
दाशाननीं आशरनाशकारिन् ! ॥ 7.77 ॥ 288

विधुन्तुदत्वं वदनं त्वदीयं
पद्मश्रियो वारणतां च धत्ते।
तथाऽपि चित्रं कवयस्समेऽमी
विधुं च पद्मं च मुधा वदन्ति ॥ 7.78 ॥ 289

रागं परं धृतवता द्विजपङ्क्तिशोभां
उच्चैस्सदाऽपिदधता दधताऽधरत्वम्।
अग्रे गृहीतमपि ते वदनं तदेतत्
सम्मानितं किल सतां पतिभिर्विभाति ॥ 7.79 ॥ 290

आननं तव विभावये विभो !
काननं न खलु तत्र संशयः।
यत्सुतुङ्गमृगलाञ्छनं वह -
त्यम्बुजातमपि शोभनं परम् ॥ 7.80 ॥ 291

सीतारामाभिरामं सुभगमतितरां पश्यतां मानवानां
चक्षुश्चेतोहरं ते द्विजगणपरिषच्छादकस्वाधराढ्यम्।
श्रीमन् ! स्वामिन् ! तदेतद् वदनमपि विभो ! भाति तुल्यं तदेतत्
त्वत्कं सत्कं च मान्यं सदनमिति भिदा कापि नास्ति द्वयोर्वै ॥ 7.81 ॥ 292

उत्तमे वदनमण्डले शुभे
तावके भवति योऽधरः प्रभो !।
सोऽयमेव वहते सुरागतां
तत्पराः किमुत तत्परो वद ॥ 7.82 ॥ 293


sundarasimham-ahobilam / prapatti dot com / sunder kidambi

नासि कामजयतोऽति सुन्दरः?
  नासि का सुभगजानकीह सा।
नासिकेत्यकलयत् स धावतीं
  नासिकाविरहितां हि लक्ष्मणः॥ **7.83**॥ 294

नासादरस्स्वोपरि वर्तमानः
  सत्यं सरागो भवितेति तत्त्वम्।
नासाधरोऽयं स भवन् सरागो
  निजादरं दर्शयतीह यत्तत्॥ **7.84**॥ 295

नासेति नारी रमणीयदेहा
  सा चोपरिष्टादिह सन्निविष्टा।
तस्यां सरागोऽस्त्यधरः किलायं
  तन्मन्दहासोऽपि स जृम्भतेऽत्र॥ **7.85**॥ 296

नासामिमां यः किल सेवते सः
  नासारमार्गे रमते कदाऽपि।
ना सारभूतो भुवने स एव
  नासां गिरां कोऽपि विपर्ययोस्ति॥ **7.86**॥ 297

नासाग्रमुक्ताभरणोत्तमस्य
  भासा त्रसन् रागयुतोधरोऽपि।
त्रासानुषङ्गेण विना कृतस्य
  नासावहो नैव विकारमेति॥ **7.87**॥ 298

नासा विभो! चम्पककुड्मलं ते
  यस्याधरः पल्लवतां बिभर्ति।
पलाशतां लोचनयुग्ममेतद्
  यत् पश्यतां नेत्रकुलं धिनोति॥ **7.88**॥ 299

sunder kidambi prapatti dot com sunder kidambi

नासा न ते दीपशिखैव सेयं
तत्राधरः पात्रतया विभाति।
सुवर्णपात्रं किल फालमेतत्
तत्रालकाः धूमतया लसन्ति ॥ 7.89 ॥ 300

मुग्धं मुखं ते रघुवंशनाथ !
बिम्बाधरं तुङ्गसमाननासम्।
कपोलफालीयुगलाभिरामं
मतिर्मदीया परिचुम्बतीयम् ॥ 7.90 ॥ 301

स्कन्दो यस्य त्रिदशसमितौ साम्यमाप्नोति किञ्चित्
सौन्दर्यश्रीविहरणनिधिः साऽऽश्विनी देवता वा।
मन्दाकिन्या मकुटगतया मण्डिताम्नातनाम्नः
मन्दो हासो मम दिशतु शं मैथिलीवल्लभस्य ॥ 7.91 ॥ 302

सुन्दस्त्रियो भीकरगर्जनेऽपि
कुन्दप्रभं कौशिकनन्दितं यत्।
मन्दस्मितं तन्मनुवंशकेतोः
मन्दस्य मे मान्द्यमपाकरोतु ॥ 7.92 ॥ 303

इन्दोः साम्यं वहति वदनं यस्य राकानिशायाः
सन्दोहं यो वितरति मुदां पश्यतां मानवानाम्।
सुन्दो नष्टः सह सहभुवा येन तस्यास्य जेतुः
मन्दो हासो जयति मधुरो मारुतेर्दैवतस्य ॥ 7.93 ॥ 304

वक्षः प्रदेशे मम संनिविष्टा
रामा रमा विष्णुतया स्थितस्य।
रक्षः प्रदेशोऽद्य निवेशिताऽभूत्
इति स्मितं ते मितमस्तु भूत्यै ॥ 7.94 ॥ 305

मन्दोदरीयं मयकन्यकाऽस्याः
मन्दोऽदरोऽभूत् पतिरासुरेन्द्रः।
मैन्दस्य वाचेति तवानने यद्
मन्दस्मितं तत् किमु राघवेदम्॥ 7.95॥ 306

मन्दस्मितं ते मधुराधरान्तः
सुधानिधिं कञ्चन निश्चिनोमि।
यतश्च्युतां यत्सकृदेव वाणीं
आस्वादयन्तो विबुधा जयन्ति॥ 7.96॥ 307

हासो हि मन्दस्तव भाति मान्यः
दासोऽपि मन्दस्तव चास्मि मान्यः।
नासाश्रयोऽयं भवतोऽस्ति दृश्यः
ना साश्रयोऽहं भवतास्मि दृश्यः॥ 7.97॥ 308

मन्दस्मितेन मधुराधरसङ्गतेन
नासापुटेन नवचम्पककोमलेन।
संवीक्षणेन सरसीरुहसारभाजा
सन्ताप एष सकलो मम शान्तिमेति॥ 7.98॥ 309

लक्षार्चनानतजनावनदीक्षितस्य
श्रीराघवस्य हृदयं नितरां धिनोति।
मन्दस्मितं मुखसरोजविकासदायि
व्यक्तं वदत्यथ हृदं परमाभिरामम्॥ 7.99॥ 310

कन्यापुष्ये मज्जनश्रीमहेऽस्मिन्
काकं दृष्ट्वा कम्पमानां तु सीताम्।
दृष्टश्रीमन्मारुतिस्संविधत्से
मन्दं हासं मत्प्रभो ! मञ्जुलं त्वम्॥ 7.100॥ 311

कर्पूरतप्तं करयोर्मम त्वं
प्रदाय पात्रं व्यथितं विधाय।
महौषधं चाथ मधु प्रदाय
मन्दस्मितं राघव ! सन्तनोषि॥ 7.101 ॥ 312

एवं व्यथा ते भविता भवे त -
च्छान्तिश्च सद्यो न भयं प्रयायाः।
इति स्मितं यत्तनुषे तदेव
मोदाय भूयश्शरणं प्रपद्ये॥ 7.102 ॥ 313

तप्तेन तप्तं पयसा किल त्वाम्
अपालयं बालतमं पुरेति।
आलोक्य मां मन्दमिति स्मितोऽसि
वयस्तवेदं त्वरितं प्रयाति॥ 7.103 ॥ 314

वयश्च भूयो मनसस्तथाऽपि
वयो नवं नाम तथैव नित्यम्।
जयोदयं पुष्यति चित्रमेतत्
मन्दस्मितं नैव तथैव रक्ष॥ 7.104 ॥ 315

मन्दस्य मे मन्मथमर्दितस्य
माधुर्यचातुर्यबहिष्कृतस्य।
धैर्येण दूरीकृतमानसस्य
मन्दस्मितं मङ्गलदं तवास्तु॥ 7.105 ॥ 316

अमन्दलक्ष्मीललितालयाय
मरन्दधारामधुराधराय।
अनन्तसन्मङ्गलदायकाय
मन्दस्मितायास्तु नमो नमस्ते॥ 7.106 ॥ 317



sunder kidambi dot com
prapatti dot com

**वैराग्यविजितस्वान्तैः प्रपत्तिविजितेश्वरैः।**
**अनुक्रोशैकविजितैरित्युपादेशि देशिकैः॥ 7.107॥** 318

॥ इति प्रकीर्णस्पन्दः समाप्तः॥

sunder kidāmbi prapatti dot com sunder kidāmbi